माघमासः
वर्षम् –६७
चतुथोऽङ्कः
विक्रमाब्द: २०७२
युगाब्द ५११७
५ फरवरी २०१६

ISSN 2249-698X

# भारती

## संस्कृत-मासपत्रिका

एकस्याः प्रतेः
१५/–
वार्षिक शुल्कम्
१२०/–
आजीवनसदस्यता
१५००/–





त्रिशूलाधारकः शुभ्रः सर्पयज्ञोपवीतकः।
चन्द्रचूडः शिवोऽस्माभिः शिवरात्रौ प्रणम्यते॥



## विषय-सूची


| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | मङ्गलाचरणम् | श्री प्यारेमोहनशर्मा | ३ |
| २ | मासावतरणम् | श्री प्यारेमोहनशर्मा | ३ |
| ३ | सम्पादकीयम् | श्री प्यारेमोहनशर्मा | ४ |
| ४ | समासलक्षणे प्राच्यनव्ययोर्मतविवेचनम् | डा. सुरेन्द्रकुमारशर्मा | ६ |
| ५ | शिक्षया कर्मसु कौशलम् | डॉ. परमेशकुमारशर्मा | ७ |
| ६ | पुत्रिकासमीक्षा | देवर्षिकलानाथशास्त्री | १० |
| ७ | षोडशः प्रसङ्गः विद्यार्थिमण्डलस्य नेतृत्वम्। | वेणीमाधव धर्माधिकारी | १३ |
| ८ | हास्य-व्यंग्य विनोदेन कालो गच्छति धीमताम् | डॉ. प्रशस्यमित्रःशास्त्री | १४ |
| ९ | न हि नाम्ना अपि तु कार्येण सुखं मिलति | श्रीमती आराधना धर्माधिकारी | १५ |
| १० | दक्षा पृच्छति | परमानन्द शर्मा ''प्रमोद'' | १५ |
| ११ | महर्षिमहिमा | अविनाश शर्मा, जयपुर | १६ |
| १२ | अक्षम्यः ब्राह्मणः | विष्णुदत्त जोशी | १७ |
| १३ | कीदृशी शिक्षा अपेक्षिता | डॉ. प्रतिभा शर्मा | १९ |
| १४ | भारतीय-स्वतंत्रता-संग्रामे ''राष्ट्रपितुः'' ....... | अर्चना शर्मा | २१ |
| १५ | कृकलासानां दायादाः | डॉ. हर्षदेवमाधवः | २२ |
| १६ | 'किं वयं जानीमः' - स्वपरीक्षणं कुर्मः | आचार्यमदनलाल शर्मा | २३ |
| १७ | सांख्यकारिकायां गुणत्रयविवेचनम् | डॉ. गीता शुक्ला | २४ |
| १८ | महाभारते मानवाधिकारः | रमेशचन्द्रबुनकरः | २६ |
| १९ | भारती | डॉ. राजकुमार मिश्रः | २८ |
| २० | नारी-स्तम्भः | डा. राजेश्वरी भट्ट | २९ |
| २० | आयुर्वेद स्तम्भः | प्रो. बनवारीलालगौडः | ३१ |
| २१ | संस्कृतसमाचारः | .... | ३४ |


### पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते ? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु- **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी-15, न्यू कॉलोनी, जयपुर-302001**

**दूरभाषः 0141-2379014, मो. 9783105699**

**(धनादेश/चैक/ड्राफ्ट केवल ''भारती'' के नाम से ही भेजें- प्रबन्ध सम्पादक)**




।। श्रीशः।।

ISSN2249-689X

# भारती

संस्कृत-मासपत्रिका





**प्रमुखसंरक्षकाः**
जगद्गुरवो निम्बार्कपीठाचार्याः श्रीराधासर्वेश्वरशरणदेवाचार्याः,

**प्रमुखसंरक्षकाः**
जगद्गुरुशङ्कराचार्यस्वामिश्रीजयेन्द्रसरस्वतीमहाभागाः

**प्रेरणास्रोतः**
स्व. परमाचार्यः
श्रीचन्द्रशेखरेन्द्रसरस्वतीमहाभागः

संस्थापकौ
स्व. उमाकान्त केशव आप्टे
( बाबा साहब आप्टे )
स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः
स्वामी विश्वेशतीर्थः
स्वामी सत्यमित्रानन्दगिरिः
स्वामी रामभद्राचार्यः
आचार्यः अविचलदासः
स्वामी विद्यानन्दसरस्वती

प्रधानसम्पादकः
देवर्षिकलानाथशास्त्री

सम्पादकः
प्यारेमोहनशर्मा

प्रबन्धसम्पादकः
सुदामा शर्मा

सहसम्पादकाः
प्रो. सुरेन्द्रकुमारशर्मा
शिवशरणनाथत्रिपाठी
डॉ. शिवचरणशर्मा

आर्थिकपरामर्शदाता
ओ.पी. गोयल

पृष्ठसंयोजनम् :
श्याम प्रिन्टर्स, 22 गोदाम, जयपुरम्
rajeshksharma69@gmail.com - 01414001974


## मङ्गलाचरणम्

नाना श्रोतवहां सदैव फलदां सर्वार्थसंसाधिकां,
यस्याः सन्निधिमात्रतो भुवि नराः पुण्यं लभन्ते चिरम्।
भक्तानामधनाशिनीं सुविमलां भागीरथीं श्रेयसे,
सर्वेभ्यः सुखदां सदा बहुजलां वन्दामहे मातरम्।।

## मासावतरणम्

मासं यावदवाप्तुमेव सुफलं पुण्ये प्रयागे जनाः,
कल्पावासमवाप्नुवन्ति कृतिनः स्नानेन तीर्थोदकैः।
घासस्योटजमारचय्य मनसा ध्यायन्ति विश्वेश्वरम्,
यज्ञेशं हवनेन ते प्रतिदिनं प्रीणन्ति भक्त्या नराः।।


कार्यालयः
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com

माघमासः
वर्षम् 67
वार्षिकशुल्कम् 120/-

विक्रमाब्दः 2072
फरवरी, 2016
पञ्चवार्षिकशुल्कम् 500/-
आजीवनसदस्यताशुल्कम् 1500/- रूप्यकाणि

अङ्कः - 4

( राजस्थान संस्कृत अकादमी के आर्थिक सहयोग से प्रकाशित )

## सम्पादकीयम्

# समाजे समरसता स्थापनीया

...✍ पं. प्यारेमोहनशर्मा

वयं जानीमो यत् समरसता समाजं योजयति। भगवता कृष्णेनापि गीतायां प्रतिपादितं "समत्वं योग उच्यते" ततोऽर्जुनः पृच्छति- "योऽयं योगस्त्वया प्रोक्तः साम्येन मधुसूदन। एतस्याहं न पश्यामि चञ्चलत्वात् स्थितिं स्थिराम्" परन्तु कृष्णेनोत्तरितम्- "अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते"। समतायुक्तसमाजरचना-विषये विद्वद्भिर्बहु भाषितम्।

समता-तत्त्वविषये स्वामी विवेकानन्दोऽकथयत् - सम्प्रति सर्वे मनुष्याः समानाः इति विषये सर्वत्र चर्चा श्रूयते, परन्तु वयं सर्वे समानाः स्म इति कथं ज्ञातुं शक्यते। तदर्थं तीक्ष्णबुद्धेरावश्यकता विद्यते। मूर्खतापूर्णकल्पना-भिर्मनः शुद्धं भवेत्। भ्रमपूर्णं मनो न भवेत्। अन्तःकरणं शुद्धं भवेत्। तदा मानवः स्वस्मिन् विद्यमानं समतातत्त्वं ज्ञातुं शक्नोति तदैव स अनुभविष्यति यत् प्रत्येको जनः तद्वदेव समानः पूर्णश्च विद्यते नास्त्यावश्यकता स्वबन्धुषु शासनस्य।

समतारूपं महत् तत्त्वं यदा वयं विस्मरामस्तदा भेदभावयुक्तस्य समाजस्य रचना जायते। यदि समयेऽस्योपचारो न कृतस्तर्हि सोऽयं भेदभावो रूढिरूपे प्रतिष्ठापयिष्यते। भारतीयसमाजे सर्वमिदं तथैव संजातम्। समतारूपं श्रेष्ठं तत्वमस्माभिः स्वीकृतम्, विचारेषु बुद्धौ वचनेषु च मान्यता प्रदत्ता परन्तु व्यवहारे तथा कर्तुं वय-मसफलाः संजाताः। अस्माभिः स्वीकृतम् "सर्वे भवन्तु सुखिनः, सर्वे सन्तु निरामयाः, सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत्।" आवश्यकता विद्यतेऽस्माकं व्यवहारे समताया उपयोगस्य।

भारते समये समये नैके महापुरुषा जनिमलभन्त। ते स्वकीयं सम्पूर्णं जीवनं समाजसुधाराय समर्पयन्। राजा-राममोहनराय, बाबासाहब-आम्बेडकरः, महात्मागांधी, विनोबाभावे, राममनोहरलोहिया, जयप्रकाशनारायणः, पं. दीनदयालउपाध्यायः, इन्दिरागांधी, अटलबिहारी-वाजपेयी प्रथमप्रधानमन्त्री पं. जवाहरलालनेहरू, प्रभृतयः सर्वे महापुरुषाः भारतस्य सामाजिकीं दुर्दशां मानवमानवे-भेदभावम् उच्चावचभावेन पतितानां तिरस्कारादिक-मपाकर्तुं महतः प्रयत्नान् कृतवन्तः। नैके सन्तः रामकृष्णपरमहंसः स्वामीविवेकानन्दः महात्माबुद्धः महात्माज्योतिरावफुल्ले राजर्षि-शाहू-महाराजनारायणगुरु प्रभृतयः स्वीयमपारं योगदानं प्रायच्छन्। सन्तः स्वकीयाचरणेन समरसतामशिक्षयन्। सम्प्रति यदि सन्तपुरुषाणां विचारान् समये-समये समाजे वयं प्रचारयिष्यामस्तर्हि समतायुक्तसमाजरचना शनैः शनैः मूर्तरूपं प्राप्स्यति। सम्प्रति भारतीयसमाजे वंचितवर्गाः, पतिताः, अस्पृश्याः, भ्रमणशीलाः, वनवासिनः, स्त्रियः सर्वेऽपि दीनहीनदशायां स्वजीवनं यापयन्ति। अतो ध्यातव्यममीषां जीवनमुन्नेतुम्। यदा सर्वेऽप्येते समुन्नता भविष्यन्ति तदैव सुदृढः समतायुक्तः समाजः उदेष्यति। एदर्थं यत् प्राथम्येन करणीयं विद्यते तद्वर्तते-

### शिक्षा सेवा च

बहुजनसमाजमुन्नेतुं सर्वतः प्रथमं शिक्षाया आवश्यकता विद्यते। एते वंचिता धनहीनः सुदूरे ग्रामे वास्तव्याः यत्र न सन्ति गमनागमनसाधनानि यत्र न वर्तते

पेयजलव्यवस्था, न विद्यते विद्युत्प्रकाशः, न सन्ति आवासगृहाः, अतः सर्वतः प्रथमं यत्र एते निवसन्ति तत्र विद्यालयाः संस्थापनीयाः, विद्यालयेषु शिक्षकाः नियोज्याः समये सर्वतः प्रथमं प्रारम्भिकी शिक्षा प्रदेया। दिने दीना उदरपोषणाय किमपि कार्यं कुर्वन्ति अतः रात्रौ-अध्यापन-व्यवस्था विधेया। स्त्रियो बालिकाश्चयापि शिक्षायै समुत्साहनीया यदि सत्यनिष्ठया एभ्यः शिक्षाप्रदानस्य व्यवस्थां शासनं करिष्यति तर्हि निश्चितरूपेण भारतीयः समाजः शीघ्रमेव पुनः स्वगौरवं प्राप्स्यति। साधारण- जनानां बुद्धेर्विकासेन राष्ट्रमुत्कृष्टतां यास्यति। देशस्य पतनमेतेनैव जातं यत् विद्यायाः परिलब्धिः बुद्धेर्विकासश्च दीर्घकालं यावत् मुष्टिमेय-जनानां हस्तेषु परिसीमितो जातः। पूर्वं भारतीया ऋषयस्तादृशान् नियमानरचयन् यैः मुष्टिमेया जना एव वेदान् विदाञ्चक्रुः। ततश्च आक्रान्तारः शासकाः समभूवन्। तेऽपि भारतीयान् श्रमिकरूपेण कार्यं कर्तुं बाध्यानकार्षुः। ततश्चाङ्ग्लाः शासनं चक्रुः आङ्गलाः स्वशासनं द्रढयितुं शिक्षा न प्रदेया भारतीयेभ्यः इति नीतिमरचयन्। लार्ड मेकाले स्पष्टं महाराज्ञीमसूचयत् यद् यावत् भारतीयाः स्वशिक्षया वञ्चिता न भविष्यान्ति तावदाङ्ग्लानां शासनं सुस्थिरं न भविष्यति। अतः संस्कृतविद्यालयास्तैः पिहिताः केवलं स्वशासनं संचालयितुं मुष्टिमेयान् जनान्-अङ्गलभाषामशिक्षयन् येन तेषां राजकार्यं भारतीयाः सम्पादयेयुः। अस्तु कथनस्यायमेवाभिप्रायो विद्यते यत् सम्प्रति समाजमुन्नेतुं पतितेभ्यो दीनेभ्यः कृषकेभ्यः स्त्रीभ्यः बालिकाभ्यः प्राथम्येन शिक्षा प्रदेया। यदि दीनाः शिक्षासमीपं नागन्तुं शक्नुवन्ति तर्हि शिक्षैव तेषां समीपे प्रेषणीया।

दुर्बलानां सेवैव नारायणसेवा विद्यते। रामकृष्ण-परमहंसविवेकानन्दाभ्यां प्रदर्शितोऽयं पन्थः। लोक-शिक्षणाय लोकसेवायै च निष्ठावन्तः श्रेष्ठाः कार्यकर्तारः स्युः। कार्यकर्तारः पूर्णरूपेण निष्कपटाचरणाः, पवित्रभावनाभृताः, बुद्धिमन्तः, स्वाभिमानिनः, इच्छाशक्तियुताः भवेयुस्तदैव ते दलितानामुत्थानाय शिक्षणाय च सर्वात्मना यतितुं शक्ष्यन्ति। एभिर्गुणैर्युक्ता मुष्टिमेया अपि जनाः समाजोन्नतिं समानताभावं चोत्पादयितुं शक्नुवन्ति।

समरसतायै सामाजिकन्यायतत्त्वस्यापि समधिकं महत्त्वं विद्यते। विना सामाजिकन्यायेन कथमपि समानतायुक्तसमाजस्य रचना संभवा न भवति। ''आधुनिकभाषायामारक्षणम्'' विद्यते सामाजिक-न्यायस्य साधनं न तु साध्यम्।

डा. अम्बेडकरो धर्मे गभीररूपेण विश्वसति स्म। स अमन्यत धर्मेणैव स्वातन्त्र्यसमताबन्धुतान्यायादीनां प्रतिष्ठापना भवितुं शक्नोति। अत एव उक्तमपि ''धर्मेण हीनाः पशुभिः समानाः''। धर्म एव नैतिकतां शिक्षयति यथा ''मातृवत् परदारेषु परद्रव्येषु लोष्ठवत्, आत्मवत् सर्वेभूतेषु यः पश्यति स पण्डितः'' ''यावद् भ्रियते जठरं तावत् स्वत्वं हि देहिनाम्। अधिकं योऽभिमन्येत स स्तेनो दण्डमर्हति'' एतत् सर्वं धर्मः शिक्षयति। डा. अम्बेडकरोऽमन्यत धर्म एव मनुष्यस्य रक्षां विदधाति ''धर्मो रक्षति रक्षितः'' अतः एवासौ बौद्धधर्म-मङ्गीचकार। भगवान् बुद्धः समाजे समतामस्थापयत्। सर्वेभ्यः स्वातन्त्र्यं बन्धुभावः न्यायश्च महात्मना बुद्धेन प्रदत्ताः। अतः सत्यनिष्ठया समाजे समतां स्थापयेयुः। वर्तमान समयस्य एष एव प्रमुखो धर्मः।

# समासलक्षणे प्राच्यनव्ययोर्मतविवेचनम्

❑ डा. सुरेन्द्रकुमारशर्मा

समसनं समासः। समुपसर्गपूर्वकात्धातोः हलश्चेति सूत्रेणाधिकरणे घञ् प्रत्यये कृते समासशब्दस्य सिद्धिर्भवति। समसनमत्र भावे घञ्। समसनं नाम संक्षेपीकरणम्। संक्षेपीकरणञ्च अनेकेषां पदानामेकी-भवनम्। तच्च स्वाव्यवहितोत्तरविभक्तिमपाकृत्य परस्परसम्मेलनरूपम्। एवञ्च यत्रानेकानि पदानि स्वप्रकृतिकविभक्तिमपाकृत्य परस्परं सम्मिलितानि विशिष्टार्थबोधकानि स्युस्तत्र समास इति व्यवहारः। परन्तु समासस्यैवंविधे लक्षणे क्रियमाणे सुबन्तस्थले दोषाभावेऽपि पचतभृज्जता'' ''खादतमोदता'' इत्यादौ तिङन्तपदानां समासे उक्तलक्षणस्यानागमनादव्याप्तिः स्यादिति समासाधिकारपठितसंज्ञावत्त्वं समासत्वमिति निर्दुष्टं तल्लक्षणं वेदितव्यम्। अत्र केचित्-

समासत्वं च - व्याकरणशास्त्रप्रणेतृपाणिन्या-दिमुनिकृतसंकेतसम्बन्धेन समासपदवत्वम्। यस्मिन् समुदाये पदद्वयं परस्परं समस्यते च समुदायः समासः। यद्वा समासत्वम् अखण्डोपाधिविशेषः। एवञ्चाखण्ड-धर्मवत्त्वं, सङ्केतसम्बन्धेन समासपदवत्त्वं वा समासत्वम् इत्याहुः। प्राचीनमतानुसारेण कृत्तद्धितैकशेषसनाद्यन्त-धातुरूपा पञ्चवृत्तयो भवन्ति। नव्यास्तु एकशेषवृत्तित्वं नेच्छन्ति। परार्थान्वितस्वार्थोपस्थापकत्वरूपवृत्तित्वस्य तत्राभावात्। अत एव समर्थः पदविधिः इति सूत्रस्याधिकारत्वपक्षे एकशेषसंग्रहः उक्तो भाष्ये। तत्र सामर्थ्यं द्विविधम्। व्यपेक्षालक्षणम् एकार्थीभावलक्षणं च। तयोर्मध्ये स्वार्थपर्यवसायिनां पदानामाकाँक्षा-दिवशाद्यः परस्परान्वय-स्तद्वायपेक्षाविधंसामर्थ्यम्। विशिष्टा अपेक्षा। व्यपेक्षेति व्युत्पत्तेः। सम्बान्धार्थः समर्थ इति व्युत्पत्तेश्च। इदं च राज्ञः पुरुष इत्यादिवाक्य एव भवति। तत्र चैकैकस्य शब्दस्य यः संनिहितो योग्यश्च तेनान्वयो भवति। तथा राज्ञः पुरुषश्चेति, देवदत्तस्य च पुरुषः इति ऋद्धस्य राज्ञः पुरुष इति च। एकार्थीभावलक्षणं सामर्थ्यं तु प्रक्रियादशायां प्रत्येक-मर्थवत्त्वेन पृथग्गृहीतानां समुदायशक्त्या विशिष्टैकार्थ-प्रतिपादकत्वरूपम्। संगतार्थः समर्थः, संसृष्टार्थः समर्थ इति व्युत्पत्तेः। संगतिः संसर्गश्चैकीभाव एव यथा संगतं घृतं तैलेनेति, एकीभूतमिति गम्यते। यथा वा संसृष्टोऽग्निरिति, एकीभूत इति गम्यते इति भाष्याच्च। इदं च सामर्थ्यं इति व्युत्पत्तेः। इदं च सामर्थ्यं राजपुरुष इत्यादिवृत्तावेव। अत एव ऋद्धस्य राजपुरुष इत्येवं पुरुषविशेषणे राज्ञि ऋद्धत्वविशेषणं नान्वेति। विशिष्टस्यैकवाक्यतया राज्ञः पदार्थैकदेशत्वा-दित्याद्यर्थकमुक्तम्। देवदत्तस्य गुरुकुलमित्यत्र तु उपसर्जनस्य नित्यसापेक्षत्वात् समासः। यद्वा गुरुवद् देवदत्तोऽपि विशेष्ये प्रधाने कुल एवान्वेति, तत्र गुरूणां कुलस्य उत्पाद्यसम्बन्धे-नान्वयः। देवदत्तेन तु कुलस्य तदीयगुरुत्वोपाद्यतयाऽन्वयो गुरुगर्भः।

**उक्तं च हरिणा-**

**सम्बन्धिशब्दसापेक्षो नित्यं सर्वः समस्यते ।**
**वाक्यवत् सा व्यपेक्षा हि वृत्तावपि न हीयते। इति**
**समुदायेन सम्बन्धो येषां गुरुकुलादिना**
**संस्पृश्यावयवास्ते तु ह्युच्यते तद्वता सह।।**

**प्राचार्यः**
**श्री दादू आचार्य संस्कृतमहाविद्यालयः, जयपुरम्**

# शिक्षया कर्मसु कौशलम्

❑ डॉ. परमेशकुमारशर्मा

प्रसिद्धं हि आभाणकं योगः कर्मसु कौशलमिति। योगेन जनानां शरीरं स्वस्थं मनः स्थिरं, आत्मा सुखी च तिष्ठति। साम्प्रतमेव योगविषये महान् क्रमः अनुश्रितः, येन सम्पूर्णविषये स्वास्थ्यलाभाय काचित् परिपाटी दृष्टिगोचरा अभूत्। अयं महान् अवसरः अस्य देशस्य कृते आसीत्। वैशिष्ट्यं हि अस्य देशस्य सर्वेषाम् अपेक्षया समूहचिन्तनम्। केचन जनाः कथयन्ति– ''योगेन वयं स्वस्थाः भवामः, स्वस्थाः सन्तः पूर्णमनोयोगेन कार्यं कुर्मः तेन कर्मकौशलं समुत्पद्यते'' इति। अपरश्च कश्चन विषयः विद्यते, शिक्षया सर्वविधोपकारः जनानां जायते, यतः शिक्षया जनेषु चातुर्यं समुत्पद्यते। जनाः कथयन्ति– ''एका चतुरीयुक्ता सकला विकला कला। एका चातुरीरहिता सकला विकला कला''। अर्थात् यस्य जीवने चातुर्यं नास्ति, तस्य जीवनम् तु व्यर्थं विद्यते। मानवजीवने चातुर्यं केवलं शिक्षया उत्पद्यते। चातुर्यं सम्यक्तया आगतं चेत् जनाः कर्मसु कौशलं सम्प्राप्तुं शक्नुवन्ति।

अधीतशिक्षः यदि स्वव्यवहारे नाम्र्यं, त्यागं, चातुर्यं च न समुत्पादितवान् तर्हि वस्तुतः तस्य जीवनं पूर्णरूपेण गौरवरहितं कार्यदृष्ट्या अनर्हं च विद्यते।। शिक्षा केवलं समञ्जनं बोधयति। शिक्षा न केवलं मानवं परिष्कृतं करोति। अपितु तस्मिन् वैशिष्ट्यम् उत्पादयति। केचन शिक्षिताः तु भवन्ति किन्तु तेषां जीवने किमपि परिवर्तनं न भवति यथा पूर्ववत् स्वकीयानि कार्याणि सम्पादयन्ति एतस्य अभिप्रायः तेषां कार्यचातुर्यं साम्प्रतमपि नैव समुत्पन्नम् इति।

शिक्षा व्यक्तेः समस्तान्तरिकशक्तीनां बहिः आनयनं कारयति। शिक्षयैव जनाः परिपोषिताः भवन्ति। यदि शिक्षा उचितदिशायां छात्रेभ्यः प्रदीयेत तर्हि अवश्यं सर्वेऽपि छात्राः कर्मसु कौशलं प्राप्नुयुः।

स्वस्थशरीरमपि शिक्षायाः एव कार्यं विद्यते। यदि मानवस्य स्वस्थशरीरं विद्यते तर्हि मानवः शिक्षायाः उचितदिशि प्रयोगं कर्तुं प्रभवति। केचन शिक्षाशास्त्रिणः कथयन्ति– ''शिक्षा शरीरदृष्ट्या, मानसिकदृष्ट्या, लक्ष्यदृष्ट्या च जनं सुदृढं करोति।'' शरीरं पूर्णरूपेण स्वस्थं विद्यते चेत् कार्यकरणे मनः रमते। तस्मिन् विषये किमपि कर्तुं स्थिरता उत्पद्यते।

चिन्तनमपि महत्त्वपूर्णं भवति यदि कस्यचिद् जनस्य चिन्तनं समुचितं न विद्यते तर्हि सः किमपि कर्तुं न प्रभवति। परेषां निन्दनापेक्षया किञ्चित् कार्यं तस्मिन् समये शक्यते येन पूर्णरूपेण सर्वविधोपकाराः छात्राणां भवितुम् अर्हेयुः। चिन्तनमेव महत्त्वपूर्णं भवति, जीवनस्य प्रत्येकं क्षेत्रे यथा कथञ्चित् चिन्तनस्य परमत्वोत्पादनाय प्रयत्नः साधनीयः। यः जनः स्वकीयं चिन्तनं प्रगाढम् उत्कृष्टं च करोति सः अवश्यम् पूर्णरूपेण समर्थः भवितुमर्हति। चिन्तनकारणेन भिक्षुकः भिक्षुकः एव तिष्ठति। उत्तमः उत्तमः एव तिष्ठति। यः कश्चनापि जनः स्वकीयं सम्यक् चिन्तनेन कर्मसु कौशलं समुत्पादमितुं शक्नोति।

तत्र मानसिकदृष्ट्या चिन्तनं क्रियते चेत् शिक्षा एव मानसिकचिन्तनं सुदृढं करोति मानसं सम्यक् भवति, तेन मानवाः स्वव्यवहारं प्रकटयितुं शक्नुवन्ति। व्यवहारस्य पूर्णरूपेण उत्तमत्वसम्पादनाय निरन्तरप्रयत्नः एव साधनीभूतः दरीदृश्यते मानसिकचिन्तनमपि शिक्षया समीचीनं जायते।

लक्ष्यमपि शिक्षया सुचिन्तितं परिष्कृतं समाजोपयोगि भवति। लक्ष्यं मानवं सर्वोपकारत्वं सूचयति। बहवः जनाः अनेकानि उत्तमानि लक्ष्यानि स्वीकृत्य समाजोपयागि कार्यं

कर्तुं प्रयतन्ते ते सफला: अपि भवन्ति। सर्वस्य मानवस्य किमपि मुख्यं कर्म वर्त्तते तर्हि तदस्ति तस्य जीवनलक्ष्यम्। शिक्षा एवं जीवनलक्ष्यम् उत्तमोत्तमं कर्तुं प्रभवति।

शिक्षया सूचनानां प्राप्ति: सम्प्रत्यानां, बौद्धिक-कौशलानाम्, अभिवृत्तीनां सामाजिकशारीरिकबौद्धिक-दर्शनानां स्वभावानामवबोधानां च अन्वेषणं निर्माणं च भवति। यदि एतत् सर्वं क्रमश: जायेत, तर्हि अवश्यं समाजोपयोगीनि कार्याणि सिद्धानि भवेयु:। सर्वविध-जीवोपकार: च जायेत यत: कर्मसु कौशलं समुत्पन्नं स्यादेव। शिक्षया मानव: आवश्यकताम् अनिवार्यतां च चिन्तपितुम् अर्हति।

अद्यत्वे यत् पर्यावरणप्रदूषणं दरीदृश्यते तत्र कारणीभूता: के इति चिन्तयाम: चेत् स्पष्टं भवेत् चाकचक्यकारणेन जायेत। यावत् वस्तुन: उपयोग: न क्रियते यावद्वस्तु साजसज्जायां नष्टीक्रियते। एतेन कर्मणि कौशलं न जायेत ए, यत: बाह्यं सर्वं पश्यति जन: न तु आन्तरिकस्थितिमिति।

शिक्षा एव सुनीतिं, सुरुचिं च अवगमयितुं शक्नोति। रुचिस्थानानि कदाचित् तात्कालिकानि सुखानि दद्यु: चेदपि पूर्णरूपेण आन्तरिकं कष्टमेव ददाति इति सुनिश्चितमेव। अर्थात् सुनीत्या एव कार्यसाधुता सम्यक्तया भवितुमर्हति इति निर्णय: स्वीकर्तुं शक्य:। सुनीतिसुरुच्यो: भेद: शिक्षया एव अवगन्तुं शक्य:।

शिक्षया एव राष्ट्रस्य सामाजिक-आर्थिक-प्राविधिक-सांस्कृतिक-क्षमता: प्रभाविता: भवन्ति। उत्तमशिक्षया मानव: सामाजिकहितं देशस्य आर्थिकहितं, प्राविधिकोन्नतिं, सांस्कृतिकहस्तान्तरणं च चिन्तयितुं शक्नोति। कम्रशीलताया: सामाजिकसंस्कृते: च आधानं छात्रेषु तदैव भवितुमर्हति यदा जन: शिक्षया सम्यक्तया सस्कारित: भवति। सामाजिकज्ञानं बोध: च यदा उत्पद्येते तदा अवश्यं मानव: पूर्णरूपेण समर्थ: सन् किमपि साधयितुं शक्नोति। सर्वस्यापि जनस्य पवित्रं कर्तव्यं विद्यते स: स्वस्य कर्मकौशलं वर्धेत।

राष्ट्रनिर्माणाय अभिनवराष्ट्रियभावनानां सामाजिक-सांस्कृतिकजागरणं पूर्णापेक्षितं विद्यते। मदीयं जीवनं किमर्थमिति प्रश्न: समाज: एव कर्तुं प्रभवति समाजस्य पूर्णदायित्वनिर्वहणं सर्वदा यशोगानाय उपयोगि विद्यते। शिक्षयैव विकास: जायते इति दृढ: संकल्प: मनसि प्रस्फुटित: भवेत्। गुणात्मकविकास: शारीरिकविकास:, बौद्धिक-विकास:, भावात्मकविकास: च केवलं शिक्षया भवितुमर्हति।

शिक्षा एव तादृशं साधनं विद्यते यया व्यावसायिकोन्नति:, उत्तरदायित्वनिर्वहणसामर्थ्यं, दोषस्वीकरणशक्ति: वाञ्छनीयावसराणां बाहुल्यं चिन्तनपावित्र्यं जिज्ञासोत्पत्ति: चेत्यादय: विषया: उत्पद्यन्ते। अर्थात् शिक्षया कौशलं वर्धत एव।

यदि मानव: स्वीयकर्तव्यपरिपालनाय सुदृढं प्रयत्नं कर्तुं बद्धपरिकर: भवति तर्हि अवश्यं तस्य प्रत्येकं कर्मणि सामर्थ्यं वैलक्ष्यं च अवश्यं दृश्येत एव। कौशलसम्पादनस्य महत्त्वपूर्ण: विषय: इत्युक्त यत् किमपि कुर्म: तन्तिमं श्रेष्ठं विशिष्टं च कर्तुं शक्नुम: तत्तु शिक्षया एव भवितुम् अर्हति। तद् बिना अन्य: कश्चनापि मार्ग: नास्ति विषयावबोधनाय।

उत्तरदायित्वनिर्वहनसामर्थ्यं साम्प्रतिककाले जनेषु नैव अवलोक्यते य: कश्चनापि जन: स्वीयं जीवनं सर्वोत्कृष्टं कर्तुं प्रयतते स्वीयोत्तरदायित्वनिर्वाह: करणीय:। तेन एव स: शिक्षित: इति भवितुमर्हेत्। संस्कारान् समुत्पादयति शिक्षा।

शासनम्, राजनीति:, व्यापार:, संग्राम:, चेत्यादिषु विषयेषु शिक्षया एव कार्यं साधयितुं शक्यते। अनेन समाजिकप्रक्रियायामपि योग्यत्वसम्पादनं केवलं शिक्षया एव भवितुमर्हति। सर्वस्य कर्मण: पूर्णविकास: शिक्षया एव भवितुमर्हति। परिवर्तनशीलताया: कारणमपि शिक्षया

भवितुमर्हति। अनुसन्धानस्य मुख्यविषयः तत्सम्बद्ध-विकासस्य पूर्णोत्कर्षः। शिक्षयैव प्रीतिः, विकासः, विश्वासः, सामरस्यं पारस्परिकता, उत्कृष्टं चिन्तनं, सर्वभूतहितचिन्तनं, सर्वसमावेशकं च जीवनं पूरकता, त्यागः चेति समुत्पन्नानि भवन्ति।

केवलमेकमेव साधनं विद्यते येन व्यक्तिः सुव्यवस्थिता सुघटिता विकसिता च भवितुमर्हति। स्वस्य विषये समाजस्य विषयेन ज्ञानसाधनं केवलं शिक्षा एव विद्यते। समृद्धिः, सफलता, प्रसन्नता च तावत् न समुत्पद्यन्ते यावत् पूर्णरूपेण सामर्थ्यविकासः न क्रियेत। सदाचारस्य उच्चादर्शनानां च प्रयोगेणैव जनानां सर्वविधोत्कर्षः भवितुं अर्हति। सम्माननं सदाचारः च एतद्द्वयं शिक्षयैव समुत्पद्यते। अतः निष्कर्षरूपेण चिन्तयितुं शक्यते यत् शिक्षयैव कर्मसु कौशलमिति।

शिक्षा एव मानवे चमत्कृतिं परोपकृतिं, त्यागवृत्तिं, परिश्रमशीलतां, नूतनसृष्टिं च समुत्पादयति। सा एव विशिष्टं कर्तुम् उत्तमवैशिष्ट्येन स्वकीयानि कार्याणि सम्पादयितुं प्रेरयति। यः मानवः विद्यया भूषितः नास्ति, सः साक्षात्पशुः पुच्छविषाणहीनः अस्ति इति मन्तव्यम् अतः एव समाजे कश्चन उत्तमत्वसमुत्पादनाय सर्वत्र समञ्जनाय च उत्तमः कल्पः चिन्तितः। सः तु शिक्षारूपः एव। भारतसर्वकारः अपि सर्वत्रापि प्रचारं प्रसारं करोति कोऽपि समाजेऽस्मिन् शिक्षारहितः न स्यात्। सर्वेषां पार्श्वे शिक्षा अवश्यं स्यादेव। शिक्षायाः अभावे किमपि भवितुं नार्हतीति शम्।

**सहायकाचार्यः ( संविदा ) ( शिक्षाशास्त्रम् )**
**रा.सं.सं., वेदव्यासपरिसरः, बलाहरः, हिमाचलप्रदेशः**

---

## ऐसे बन सकते है आप भारती पत्रिका के ग्राहक :-

भारती पत्रिका का वार्षिक शुल्क रुपये 120/–, पंचवर्षीय शुल्क 500/–, आजीवन सदस्यता (15 वर्ष) शुल्क 1500/– मात्र है। आप केनरा बैंक की किसी भी शाखा में जाकर हमारे निम्नलिखित खाते में राशि जमा करा कर जमा रसीद की फोटो प्रति ई–मेल से या डाक द्वारा भिजवा देवें।

खाते का नाम – **भारती**

खाता संख्या – **2139101912502**

**IFS Code - CNRB0002139**

❑ देवर्षि कलानाथशास्त्री

# पुस्तकसमीक्षा

## स्तुतिकुसुमाञ्जलिः

शिवभक्तेन काश्मीरकमहाकविना श्रीजगद्धरभट्टेन विविधच्छन्दःसु विरचितं शिवस्तुतिकाव्यं स्तुतिकुसुमाञ्जलिः सुप्रथितं विद्वत्समाजे। चतुर्दश्यां शताब्द्यां प्रणीतमिदं काव्यं 38 स्तोत्राणां संग्रहरूपमस्ति येषु शम्भोर्हसितवर्णनम्, अर्ध-नारीश्वरस्तुतिः करुणक्रन्दनम्, सेवाभिनन्दनम् इत्यादिविषय-वस्तु परिगृह्य यमकविविधानुप्रासादिविभिन्नालङ्कारसंव-लितानि त्रिंशत्तोऽप्यधिकासु वृत्तजातिषु निबद्धानि सुललितानि 1440 पद्यानि शताब्दीभ्यो विदुषां कण्ठहारता-माप्तानि। काव्यस्यास्य प्रकाशनं 1891 ई. वर्षे काव्यमालायां सञ्जातमभूत्, एकां संस्कृतटीकां समावेश्य तदनन्तरमप्यस्य प्रकाशनं केनचन कृतं, पं. प्रेमवल्लभत्रिपाठिनामकेन केनचन विदुषा कृतो हिन्द्यनुवादोऽपि प्रायः शतवर्षपूर्वं प्राकाशि किन्तु विगतेषु दशकेषु काव्यमिदमप्राप्यमेवाऽभूत्। श्रीमाधवानन्द-स्वामिना (योगतन्त्रादिविशारदेन) काव्यस्यास्य सानुवादं प्रकाशनं चिकीर्षितमभूत् तेन चास्य काव्यस्य हिन्दीटीका-लेखनाय सुप्रथितो विद्वद्वर्यः कविशिरोमणिदेवर्षिभट्टश्री-मथुरानाथशास्त्री समनुरुद्धः। भट्टमहाभागेन हिन्दी-टीका-लेखनमारब्धम्। 12 स्तोत्राणां टीका सम्पूरिताऽपि किन्तु माधवानन्दस्वामिनां भट्टमथुरानाथशास्त्रिणां च स्वर्गमनेन नाऽभूत् प्रकाशनमस्य काव्यस्य।

सुमहतः सन्तोषस्यायं विषयो यत् प्रसिद्धपत्रकार-प्रवरस्य कविवर्यस्य राष्ट्रपतिसम्मानितस्य पद्मश्री डॉ. रमाकान्तशुक्लस्य सम्पादने संस्कृतविश्वविद्यालयरूपेण राष्ट्रियसंस्कृतसंस्थानेन साम्प्रतमस्य काव्यस्य प्रकाशनं कृतमस्ति यत्र 38 स्तोत्ररूपं समग्रं काव्यं सुवाच्याक्षरेषु प्रकाशितमस्ति, भट्टश्रीमथुरानाथशास्त्रिकृता 12 स्तोत्राणां हिन्दीटीकाऽपि तदनन्तरमस्मिन् ग्रन्थे मुद्रिताऽस्ति। ग्रन्थारम्भे कुलपतेः डॉ. राधावल्लभत्रिपाठिनः, सम्पादकस्य डॉ. रमाकान्तशुक्लस्य च भूमिका मुद्रिताऽस्ति, टीकाया आरम्भे डॉ. रमाकान्तशुक्लस्य, हिन्दीटीकालेखकपुत्रस्य देवर्षि-कलानाथशास्त्रिणश्च भूमिकाऽपि मुद्रिता।

**स्तुतितुकुसुमाञ्जलिः** (जगद्धरभट्टविरचितः) हिन्दी-टीकालेखकः कविशिरोमणिदेवर्षिभट्टश्रीमथुरानाथशास्त्री, सम्पा. डॉ. रमाकान्तशुक्लः प्रका. राष्ट्रियसंस्कृतसंस्थान, 56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी नई दिल्ली 58 पृ.सं. 440 मू. 383/-.

## योगविवेचको ग्रन्थः

''योग''- स्य महत्त्वं गते कालखण्डे सुभृशमवगतं विश्वजनैरिति स्पष्टीभवति 21 जूनदिवसस्य विश्वयोग-दिवसरूपेण घोषितत्वात्, विश्वस्य सर्वाधिकैर्देशैः समर्थितत्वाच्च। योगः खलु भारतीयसंस्कृतौ षड्-दर्शनेष्वेकतमः, साधनाया एकः प्रकारः, व्यवस्थाफल-स्यैकाऽभिव्यक्तिः (कालसर्पयोग, केमद्रुमयोगप्रभृतिषु फलादेशस्यैक आधारः) इति प्रभूतोऽस्याऽऽयामः। सामान्यजनेषु त्वद्य योगशब्द आसनप्राणायामादिविधाया एव बोधक इति कथान्तरम्। योगस्य (योगसाधनायाः) किं स्वरूपमुपलभ्यते किंवा महत्त्वमुपदिष्टं भारतीयसंस्कृताविति विवेचयन्नेको ग्रन्थः सपद्येव प्रकाशितोऽस्ति यत्र वेद-कालादारभ्य गोस्वामितुलसीदासपर्यन्तं भारतीयवाङ्मये

योगस्य के प्रकारा वर्णिता इति सप्रमाणं सोदाहरणं च दशस्वध्यायेषु स्पष्टीकृतमस्ति। अत्र हि वेदेषु संकेतितायाः साधनायाः स्वरूपं प्रदर्श्य पतञ्जल्यादिभिरनुशिष्टानां योगाङ्गानां, मन्त्रयोग, हठयोग, लययोग- राजयोगादीनां च स्वरूपमुपनिषदां, गीताया, योगसूत्रस्य च प्रमाणैर्वर्णयित्वा भक्तियोगस्यापि वर्णनं कृतमस्ति, आसन-प्राणायामादीनामपि विवरणं प्रत्तमस्ति, कुण्डलिनी सुषुम्णादिविवेचनपूर्वकं योग-साधनाऽपि स्पष्टीकृता। 21 योगोपनिषदो योगविवेचनं कुर्वन्ति, गीताऽपि ज्ञानयोग-कर्मयोग-भक्तियोगादीनु-पदिशति, योगवासिष्ठेऽपर एव प्रकारः प्रदर्शितः, इत्यादि स्पष्टीकुर्वन्त्या लेखिकया योगस्य सप्तभूमिकानां मनुयाज्ञवल्क्यादिस्मृतिप्रमाणैः सङ्केतः कृतोऽस्त्यत्र, तदनु योगस्य 29 अपराः सिद्धयः ''परा सिद्धिश्च'' गीतो-पनिषद्भागवत ''सन्तसाहित्या'' दि सन्दर्भैर्विवेचिताः। लेखिका राजस्थानविश्वविद्यालयस्य संस्कृतविभागे सहायकाचार्यपदमधितिष्ठन्ती डॉ. सुनीताशर्मा (प्रथम) वर्तते।

इत्थं हि संस्कृतवाङ्मये कथं सहस्राब्दीभ्यो योगपरम्परा प्रवहतीति सप्रमाणं विवेचयन्नयं ग्रन्थो नूतनां दृशमपि प्रददाति, व्यापकं फलकं स्पृशन् योगस्य महत्त्वमपि स्पष्टीकरोतीति सर्वविधानां पाठकानां महान्तमुपकारं कुर्यादित्याशास्यते।

**संस्कृतवाङ्मय में योगसाधना** ले. डॉ. सुनीता शर्मा (प्रथम) प्रका. आस्था प्रकाशन, एस 11, एस.जी.एम. हाउस, नाटाणियों का रास्ता, चौड़ा रास्ता, जयपुर-3 पृ.सं. 172 मू. 550/-.

## चाणक्यपरिचायको ग्रन्थः

सुप्रथित एव परमबुद्धिमान्, मौर्यसाम्राज्यस्थापना-धिगतयशा अर्थशास्त्रप्रणेता विष्णुगुप्तो यो हि चाणक्य, कौटल्य, कौटिल्यादिनामभिरपि सुविदितः। एतल्लिखित-मर्थशास्त्रं राजनयस्य मूर्धन्यं सार्वकालिकं शास्त्रमस्ति किन्तु मध्यकाले तस्य विलोपात्तस्याध्ययनमपि व्यलुप्यत। विंश्यां शताब्द्यां श्यामशास्त्रिणा कौटिलीयार्थशास्त्रस्यान्वेषण-मनुवादश्च विहितौ, तदन्वस्य प्रतिष्ठा पुनरारब्धा तथाप्यद्य कस्मिंश्चनापि पाठ्यक्रमे तदिदं निर्धारितं स्यादिति न ज्ञायते। भारतस्वातन्त्र्यानन्तरं यदा पञ्जाब विश्वविद्यालयः पाकिस्तानं परित्यज्य ईस्टपंजाबयूनिवर्सिटीनाम्ना पटियालायां समागतस्तदाऽस्य सर्वोच्च ''शास्त्रि'' परीक्षायामिदम-निवार्यत्वेन निरधार्यतेति स्मरामि। नाद्यत्वे कुत्रचनाऽप्य-स्याऽध्ययनमनिवार्यम्। एतस्य परिशीलनमवश्यं क्रियते शोधविद्वद्भिः।

हर्षस्येदं वृत्तं यज्जयपुरस्थे सुप्रथिते स्नातकोत्तरसंस्कृत-महाविद्यालये महाराजसंस्कृतकालेजाख्ये गताब्दस्य दिसम्बरमासे कौटिलीयार्थशास्त्रं विवेचयितुं राष्ट्रीया विद्वद्गोष्ठी समायोजिता यस्यां मूर्धन्यैर्विद्वद्भिः शोधार्थिभिश्च समीचीनं विवेचनमकारि, बहूनि शोधपत्राणि चार्थशास्त्रे वर्णितानां विविधविषयाणां विश्लेषणपराणि प्रास्तूयन्त। सवैषामेषां ग्रन्थाकारे सङ्कलनमपि प्राकाश्यत यस्मिन् बहूनि संग्रहणीयानि तथ्यानि द्रष्टुं शक्यन्ते। ग्रन्थेऽस्मिन् 49 शोधपत्राणि हिन्दीभाषायां 8 शोधपत्राणि चाङ्गलभाषायां निबद्धानि राजनीति-दण्डव्यवस्था-गुप्तचरविद्या-विदेश-नीति-न्यायप्रक्रियाऽर्थव्यवस्था-करप्रणाली-व्यवसाय-नियमन-भ्रष्टाचारनिरोधादि विविधविषयाणां कौटिलीयार्थ-

शास्त्रमाधृत्य साधीयो विवेचनं प्रस्तुवन्ति।

**कौटिल्य का अर्थशास्त्र, अतीत एवं वर्तमानः-** सम्पादक डॉ. भास्करशर्मा श्रोत्रिय, डॉ. कमलकिशोर सैनी, प्रकाशक जगदीश संस्कृत पुस्तकालय, झालानियों का रास्ता, किशनपोल बाजार, जयपुर, पृ.सं. 350 मू. 450/-.

## गणितग्रन्थः

वेदाङ्गत्वेन प्रसिद्धस्य ज्योतिर्विज्ञानस्य तिस्रः शाखाः ''सिद्धान्त-होरा-संहिते'' ति सर्वविदिताः-सन्ति। सिद्धान्त- ज्यौतिषं प्रमुखं शास्त्रमस्ति यद् गणितज्यौतिषमिति प्रसिद्धं यत्र ग्रहचारादिपरिज्ञानं बीजगणिताङ्कगणित-ज्यामित्यादि-गणितविज्ञानशाखानां साहाय्येन शोध्यते। अस्य गणित- ज्योतिषस्य सुमहान् प्रसारो भारतेऽभूत्। को न जानाति आर्यभटवराहमिहिर-भास्कराचार्य-ब्रह्मगुप्त प्रभृतीन् प्राचीन-शास्त्रकारान् जगन्नाथसम्राट्-नयनसुखोपाध्याय-बापूदेव-शास्त्री गणेशदैवज्ञ-सुधाकरद्विवेदिप्रभृतीन् परवर्तिशास्त्र- कारांश्च यैर्गणितज्योतिःशास्त्रस्य प्रभूतं विवेचनमकारि। एतस्यैव प्रमुखमङ्गमस्ति ज्यामितिः, क्षेत्रमितिः, त्रिकोणमितिः, रेखागणितमित्यादिनामभिः परिज्ञेयं विज्ञानं शास्त्रं वा। एतस्यैव शास्त्रस्य परिज्ञानाय जयपुरीयेण ज्योतिर्विदा पं. शिवचरणशास्त्रिणा शास्त्रीयसंस्कृतभाषायां लिखितो ग्रन्थः ''ज्यासिद्धान्ताः'' शीर्षकवहो जयपुरात् प्रकाशितो यत्र त्रिज्या, कोटिज्या, भुजज्या इत्यादीनां स्पष्टीकरणं सविवेचनं कृतमस्ति। अयं ग्रन्थः प्रमाणयेद् यदाधुनिका गणितविद्वांसश्छात्राश्च ज्यामेट्री-ट्रिगनोमेट्री- प्रभृतिगणितशास्त्रशाखान्तर्गतं यथाऽध्ययनं कुर्वन्ति तथा प्राचीना भारतीया ज्योतिर्विदोऽपि संस्कृतमाध्यमेना- ध्ययनाध्यापन शोध-ग्रन्थ लेखनादिकार्याणि कुर्वन्ति स्म।

ग्रन्थे स्पष्टोदाहरणान्यपि सन्ति, भूमिका अपि, अन्ते संस्कृताङ्गलभाषा शब्दपर्यायसूच्यादिकमपि परिशिष्टरूपेण मुद्रितं येन पाठका जानीयुर्यद् गणितज्योतिषस्य याः संज्ञाः संस्कृते सन्ति तासामाङ्गलभाषायां विश्वप्रसिद्धाः पर्यायाः के? अत्र हि नक्षत्राणामाङ्गलभाषा संज्ञा अपि सूचिताः सन्ति।

ग्रन्थोऽयं पं. शिचरणशास्त्रिणो यशः प्रसारयेत्, सर्वविधानां पाठकानामुपकारकश्च स्यादिति विश्वसन्तो वर्धापयामो लेखकवर्यम्।

**ज्यासिद्धान्ताः** (मौलिकः शोधः) सम्पादकः पं. शिवचरणशास्त्री, प्रका. राष्ट्रीय संस्कृत साहित्य केन्द्र 222, सरस्वतीसदन बिहारी जी की गली, सोंखियों का रास्ता, किशनपोल बाजार, जयपुर पृ. सं. 80, मू. 100/-.

---

**संस्कृतसमाचारः**

# पं. विश्वनाथमिश्रो दिवंगतः

❑ **देवर्षि कलानाथशास्त्री**

**राष्ट्रपति सम्मानिताय न्याय-व्याकरणादिसर्वशास्त्र-विशारदाय 28 जनवरी दिने दिवयारूढय पं. श्रीविश्वनाथमिश्राय भारती परिवारः श्रद्धाञ्जलिमर्पयति।**

पूज्यबाबासाहेब आप्टेमहोदयानां व्यक्तित्ववर्णने

# षोडशः प्रसङ्गः विद्यार्थिमण्डलस्य नेतृत्वम्।

❑ वेणीमाधव धर्माधिकारी

नागपुरतः मनोहरराव ओकमहोदयाः वर्णयन्ति ईशवीये पंचविंशत्युत्तरैकोनविंशतिशततमे वर्षेऽहं अष्टमकक्षामुत्तीर्य पटवर्द्धनोच्चमाध्यमिकविद्यालयेऽध्येतुं नागपुरे समागतः। तस्मिन् समये बाबासाहेबआप्टे-महोदयाः देश सेवक-मुद्रणालये टंकणकर्तृपदे कार्यं कुर्वाणा आसन्। तदा ते सीताबर्डीवसतौ तेलीपुरास्थाने बूटेस्त्रिपर्ववति भवने तृतीये पर्वणि निवसन्तिस्म। स्वर्गीयाः श्रीनानाभिशीकरमहोदयाः आसन्मे सहपाठिनः ते विद्यार्थिजीवनत एवासन् श्रेष्ठतमा लेखकाः यद्यपि बाबामहोदयाः देशसेवकमुद्रणालये कार्यं कुर्वन्तिस्म तथापि ते स्वस्वाभाविकप्रवृत्त्या देशप्रेमिणां नवयुवकानामन्वेषणे निरता आसन्। पाठशालास्वध्येतृ-भिरसंख्यै र्नवयुवकैस्तेषां परिचयो घनिष्ठसम्बन्धश्चासीत्। अस्यां स्थितौ सर्वोत्तमलेखकेन कर्त्तृत्ववता नवयुवकेन भिशीकरमहोदयेन सह दूरता असंभवैव। भिशीकर-महोदयद्वारैव मे परिचयो बाबामहोदयैः सह संजातः।

देशसेवार्थं नवयुवकान् स्वसहयोगे आनेतुं तांश्च तेजस्विविचारैः परिपूरणोद्देश्येनैव तेषु दिवसेषु बाबामहोदयैः ''विद्यार्थिमण्डलस्य प्रारम्भः कृत आसीत्।'' अस्मिन् विद्यार्थिमण्डले सम्यक् चयनितेभ्य एव प्रवेशःयप्रदीयते स्म।

ते दिवसाः खलु देशस्य स्वातन्त्र्यार्थं संघर्षस्य दिवसा आसन्। विद्यार्थिमण्डले क्रान्तिकारिणां जीवनचरित्राणि पाठ्यन्तेस्म। राष्ट्रीयस्वाभिमानस्य गीतानि गीयन्तेस्म। लेखानां पठनं तेषु चर्चाः भवन्ति स्म। एतेषु सर्वेष्वेव कार्यक्रमेषु श्रीमन्तो बाबामहोदयाः महत्या निष्ठयोत्साहेन च विद्यार्थिमिः सह सहभागिनो भवन्ति स्म। अस्मिन्नेव कालखण्डे स्वातन्त्र्य वीरस्य सावरकरस्य द्वे पुस्तके ''माझी जन्मठेप'' गोमान्तककाव्यञ्च प्रकाशिते। एतयोरपि पठनं तत्र भवतिस्म। कवेर्गोविन्दस्य स्वातन्त्र्यगीतानि बाबामहोदयाः महत्या तन्मयतया सर्वैस्सह सम्मिल्य गायन्ति स्म। एतादृशेषु सर्वेष्वेव कार्यक्रमेषु यत्र राष्ट्रभक्तेर्हिन्दुत्वस्य च घोषो भविता ते स्वयमेव न अपितु स्वेन सह स्वस्य तरुणसहयोगिनोऽपि नयन्ति स्म। उदाहरणार्थम् 1929 तमे वर्षे श्रीमन्तः पांचले- गांवकरमहाराजाः प्रथमवारं नागपुरे समायाताः, राजाराम वाचनालयस्य पृष्ठतः स्थिते विस्तृते क्षेत्रे च तेषां भाषणमभवत्, तदा बाबामहोदयेन हरिभाऊलेले महोदयेन सह सम्मिल्य ''तुम हम सब हिन्दु-बन्धुबन्धु'' गीतमिदं गीतम्। एवं ते स्वयमेवाग्रेसंवर्द्धय राष्ट्रभक्तेः प्रेरणां जागरयितुं कार्यं प्रयत्नपूर्वकं कुर्वन्तिस्म।

# हास्य-व्यंग्य विनोदेन कालो गच्छति धीमताम्

❑ डॉ. प्रशस्यमित्रःशास्त्री
(साहित्य-अकादमी-राष्ट्रपतिसम्मान प्राप्तः)

## कुरूपा कृपणोऽथवा ?

विवाहाऽनन्तरं कश्चिद् वरः पण्डितमाह यत्।
महोदय ! कियत् तावद् दातव्यं दक्षिणा-धनम्।।
वरस्य प्रश्नमाकर्ण्य पण्डितः प्रत्युवाच यत्।
वध्वाः सौन्दर्यमालक्ष्य दक्षिणा मे प्रवर्तते।।
परन्तु स वरस्तत्र शतं रूप्याणि केवलम्।
स्वीय-स्यूतात् तु निःसार्य पण्डिताय ददौ तदा।।
दत्त्वा च स विवाहस्य मण्डपात् तत्क्षणं यदा।
वध्वा सार्धं समुत्थाय निर्गन्तुम् उद्यतोऽभवत्।।
वायोस्तदैव वेगेन वध्वास्तत्राऽवगुण्ठनम्।
शिरसः पतितं तस्या मुखं च दृश्यतां गतम्।।
पण्डितस्तु तदालोक्य वरं प्राह स्मिताऽऽननः।
अवशिष्टं धनं तावत्-कृपया नयतां भवान्।।

## सदाऽवगुण्ठनं कार्यम्

कुरूपा महिला काचित् सौन्दर्यम्प्राप्तुमिच्छुका।
सौन्दर्य साधना-केन्द्रे (ब्यूटी पार्लर) सहर्षं समुपागता।।
सौन्दर्यापणिकं सा च पप्रच्छ यत् कियद् भवेत्।
सौन्दर्य-साधना-मूल्यम् इति ज्ञातुं समुत्सुका।।
निरूप्य महिलां तां च जगादाऽऽपणिकस्तदा।
दश-सहस्र-रूप्याणि, शुल्कं तत्र भविष्यति।।
आपणिकस्य संश्रुत्य वचः सा महिला तदा।
निराशाभावनापन्ना शुल्के न्यूनत्वमाह सा।।
आपाणिकस्तदा तस्यै शुल्के न्यूनत्वमिङ्गयन्।
पञ्च-सहस्र-रूप्याणि सौन्द्रर्यार्थम् अयाचत।।
न्यूनताम्पुनरिच्छन्ती महिला सा ब्रवीति यत्।
इतोऽपि न्यूनता काचित् किं न संभाव्यतेऽधुना।।
तस्या वाचं निशम्याऽथ क्षुब्ध आपणिकोऽब्रवीत्।
मुखेऽवगुण्ठनं कृत्वा कृपया यातु सर्वदा।।

## जागर्मि सप्त-वादने

कारागारे निरुद्धं तु मृत्युदण्डेन दण्डितम्।
यदाऽपराधिनं कारागाराऽध्यक्षो जगाद यत्।।
श्वस्तने दिवसे प्रातः समये पञ्च-वादने।
गलाऽर्गलस्य (फांसी) दण्डं ते निश्चयेन प्रदास्यते।।
समाकर्ण्य तु तद्वाक्यम् अपराधी ब्रवीति यत्।
परं षड्वादनं यावत् नित्यं स्वपिमि हे प्रभो।।

## पूर्वं तानि व्ययं कुरु

याच्ञाभावसमापन्नः भिक्षुकः कश्चिदेकदा।
देवदत्तमुवाचैवं वचनं स्निग्धया गिरा।।
''भगवन्तं तु संस्मृत्य हे स्वामिन्! कृपया भवान्।
भिक्षारूपेण किञ्चित् तु धनं मह्यं प्रयच्छतु।।''
देवदत्तस्तदा तत्र स्वीयस्यूतात् तु तत्क्षणम्।
निःसार्य शतरूप्याणां नोटपत्रं तमब्रवीत्।।
किं भो ! तव समीपे किं पञ्चाशत् रूप्यकाणि वै।
वर्त्तन्ते वा न वा तत्र ज्ञातुमिच्छाम्यहं परम्।।
प्रसन्नो भिक्षुकस्तत्र पञ्चाशत् रूप्यकाणि तु।
प्राप्तुमिच्छुस्तदा बूते ''वर्तन्ते रूप्यकाणि वै''।।
तच्छ्रुत्वा देवदत्तस्तु शतं रूप्याणि तानि स।
स्वीये स्यूते सुरक्षन् वै भिक्षुकं तं जगाद यत्।।
अस्तु, पूर्वं व्ययं कृत्वा पञ्चाशत् रूप्यकाणि भो।
भिक्षार्थं पुनरायाहि मत्पार्श्वे श्वस्तने दिने।।

बी-29, आनन्द नगर, रायबरेली

'प्रेरक प्रसङ्गशतकम्' पञ्चत्रिंशः प्रसङ्गः

# न हि नाम्ना अपि तु कार्येण सुखं मिलति

❑ श्रीमती आराधना धर्माधिकारी

श्रीलालबहादुशास्त्रिणः एकदा लोकसेवामण्डलस्य सदस्याः अभवन्। ते नैवाभिलषन्तिस्म यत्तेषां नाम क्वापि प्रकाशितं स्यात्। एकस्मिन् दिने तेषामेवैकेन सहकर्मिणा पृष्टं यद् भवद्भ्यः समाचारपत्रेषु स्वनाम प्रकाशने इयती ग्लानिः किमिति अनुभूयते इदं तु गौरववर्द्धकं कार्यम्। शास्त्रिणा कथितम् तव कथनं स्वस्थाने समीचीनम् परं मह्यं भासते नाम्नः इच्छया कार्यकरणेच्छा कर्त्तव्यपालनेच्छा च बाधिता भवति। इदं सत्यं सज्जनेषु नाम्नः रव्यातेश्चाभिलाषा भवति। परं प्रायो दृश्यते यदियं वर्द्धमाना भवति, कर्तव्यभावश्च क्षीणो भवति। वास्तविकं सुखं तु कर्तव्यपालनेन भवति। अतएवाहं ख्यातेः लालसां त्यक्त्वा सत्यसुखाय महत्वं ददामि। स्व कर्त्तव्यपालनं च करोमि।

218, धर्माधिकारीभवनम्, ब्रह्मपुरी, जयपुरम्

( बालगीतम् )

# ।। दक्षा पृच्छति।।

❑ परमानन्द शर्मा ''प्रमोद''

दक्षा पृच्छति शृणु भो भ्रातः।
उदयति सूर्यः कथं च प्रातः।।
रात्रौ गच्छति कुत्र प्रकाशः।
दिवसे कथं च तमसो नाशः।।

कथं वर्धते शीताघातः।
कथं च प्रवहति आतपवातः।।
मेघः कथं प्रवर्षति नीरम्।
ज्ञातुंह्येतत् चेतोऽधीरम्।।

भ्राता वदति च शृणु भो दक्षे।
पृथिवी भ्रमति हि नित्यमक्षे।।
तेन च दिवसः क्रमशो रजनी।
दिवसे भवति प्रकाशितावनी।।

रात्रौ तमः विवर्धते लोके।
गच्छति विश्वं तस्मिन् शोके।।
द्वादशमासा भवन्ति दक्षे।
भ्रमति यदा पृथिवी निजकक्षे।।

तस्मिन् वर्षाशिशिरवसन्तः।
ग्रीष्मशरत्पुनरपि हेमन्तः।।
वर्षे षड् ऋतवो आयान्ति।
क्रमशो मासद्वयं प्रतिभान्ति।।

उत्तरायणे तपति च भानुः।
दीर्घा दिवसा ज्वलति कृशानुः।।
दक्षिणायने भ्रमति दिनेशः।
प्रहरति शीताघातो ह्येषः।।

बाष्पं भूत्वोद्गच्छति नीरम्।
गगनमण्डले धरति शरीरम्।।
वर्षाकाले गर्जति मेघः।
वर्षति मधुरं नीरमशेषम्।।

तेन जीवनं सृष्टिविकासः।
भवति पृथिव्यां नव उल्लासः।।
एवं सृष्टेर्नवसंरचना।
श्रुत्वा दक्षा निद्रामग्ना।

रा. उ. मा. वि., आगूँचा
जिला- भीलवाड़ा

# महर्षिमहिमा

❑ अविनाश शर्मा, जयपुर

**दधीचि** :- दधीचिः अथर्वमुनेः सकाशात् कर्दमस्य कन्यायां शान्तिनाम्न्यां जातः। वृत्रवधार्थं देवैरस्यास्थिभिर्वज्रं निर्मितम्। देवैः यदा विष्णुस्तस्य वधार्थं प्रार्थितः तदा विष्णुना कथितं दधीचिमहर्षेः अस्थिनिर्मितम् आयुधमेव तं वृत्रासुरं हन्तुम् क्षमम्-तत् श्रुत्वा देवैः स मुनिसत्तमो दधीचिः याचितः सोऽपि प्राणायामं कृत्वा योगबलेन च देहं त्यक्त्वा देवेभ्यो अस्थीनि ददौ। तस्यास्थिभिः विश्वकर्मा वज्रशूलचक्रगदादीनि प्रहरणानि कारयामास, तैश्च देवगणैः वृत्रासुरस्य संहारः कृतः।

**मनुः**- प्रतिकल्पं चतुर्दशमनवः स्वायम्भुवः, स्वारोचिषः, उत्तमः, तामसः, रैवतः, चाक्षुसः (एते गताः) वैवस्वतः (वर्तमानोऽयम्) इत्यादयः भवन्ति। वेदेषु मनुः अखिलायाः मानवजातेः जनको वर्णितः। संसारे प्रथमो यज्ञकर्ता मनुरासीत्। मनुना वशिष्ठाय ब्रह्मविद्या प्रदत्ता, तया च वशिष्ठो ब्रह्मनिष्ठो अभूत्। धार्मिकनियमानां प्रवर्तनस्य कार्यं मनुना कृतमासीत्।

**भृगुः**- 'भृगु' इति नामकाः त्रयः प्रख्याता ऋषयः अभूवन्। वैदिको भृगुः अथर्ववेदस्य प्रवर्तको मन्यते। तस्य धाता विधाता च द्वौ पुत्रौ आस्ताम्। पुराणेषु वर्णितः भृगुः शिवेन साकं युद्धमकरोत्। सः संजीवनीविद्यायाः ज्ञाता आसीत् स्वायम्भुवमनुना-ब्रह्मविष्णुशिवेषु त्रिदेवेषु कः श्रेष्ठः इति निर्णयं भृगुर्दद्यात्- इति निश्चितम्। भृगुणा च त्रयाणां देवानां परीक्षा कृता तस्यां परीक्षायां भगवान् विष्णुः भृगोः चरणं स्वहृदये धृत्वा तं प्रणतवान्। श्रीविष्णोः इमं विनयभावं दृष्ट्वा भृगुणा स श्रेष्ठो घोषिंतः सप्तर्षिगणेऽपि भृगोः गणना कृतास्ति। वैवस्वते मन्वन्तरेऽपि एको भृगुनामको महान् महर्षिः सम्भूतः। तेन उन्मत्तो नहुषः शासनात् च्युतः कृतः। वैतहव्यनामकाय अब्राह्मणाय ब्राह्मणत्वं प्रदाय तेन गृत्समदनामकस्य ब्राह्मणवंशस्य प्रारम्भः कृतः च्यवनपरशुरामसदृशाः श्रेष्ठपुरुषाः भृगुवंशे समुत्पन्ना अभूवन्। भृगुस्मृतिः भृगुगीता भृगुसिद्धान्तः इत्यादयो भृगुनिर्मिताः ग्रन्थाः प्रसिद्धाः सन्ति।

क्रमशः....

**हिन्दी अनुवाद** :-

दधीचि अथर्वमुनि व शान्ति के पुत्र थे। वृत्रासुर के वध के लिए देवताओं ने उनकी हड्डियों से वज्र बनाया था। देवताओं द्वारा जब भगवान् विष्णु से प्रार्थना की गई भगवान् विष्णु ने कहा कि 'वृत्रासुर' का वध दधीचि ऋषि की हड्डियों से बने अस्त्र से ही हो सकता है। यह सुनकर देवताओं द्वारा श्रेष्ठमुनि दधीचि से याचना की गई तब महर्षि दधीचि ने प्राणायाम करके योगबल से देहत्याग करके देवताओं को अपनी अस्थियां दे दी उनकी अस्थियों से विश्वकर्ता ने वज्र शूल चक्र गदा आदि शस्त्र बनाकर देवताओं को दे दिये। उन शस्त्रों से देवताओं ने वृत्रासुर का संहार कर दिया। दधीचि ऋषि की अन्य भी कथाएँ पुराणों में वर्णित है।

**मनु** :- प्रत्येक कल्प में चौदह मनु स्वायम्भुव स्वारोचिष, उत्तम, तामस रैवत चाक्षस वैवस्वत इत्यादि होते है। वेदों में मनु को सम्पूर्ण मानव जाति का जनक बताया है। संसार में यह प्रथम यज्ञकर्ता मुनि था। मनु ने वशिष्ठ ऋषि को ब्रह्मविद्या प्रदान की जिससे वशिष्ठ ब्रह्मनिष्ठ हुए। धार्मिक नियमों के प्रवर्तन का कार्य मनु ने किया था।

**भृगु** :- भृगु नाम के तीन प्रख्यात ऋषि हुए हैं। वैदिक भृगु अथर्ववेद के प्रवर्तक माने जाते हैं। उनके धाता व विधाता ये दो पुत्र थे। पुराणों में वर्णित भृगु ने शिवजी के साथ युद्ध किया था। वह संजीवनी विद्या का ज्ञाता था। स्वायम्भुव मनु ने ब्रह्मा, विष्णु, शिव इन तीनों देवों में श्रेष्ठ कौन है यह प्रतिपादन करने का निर्णय भृगु दें- यह निश्चय किया। भृगु ने तीनों देवताओं की परीक्षा की। इस परीक्षा में भगवान् विष्णु ने भृगु के चरणों को अपने हृदय में धारण कर उन्हें प्रणाम किया था।

श्री विष्णु के इस विनयभाव को देखकर भृगु ने उन्हें श्रेष्ठ घोषित किया था। सप्तर्षिगण में भी भृगु की गणना की है। वैवस्वत मन्वन्तर में भी एक भृगु नामक महर्षि हुए थे। उन्होंने उन्मत्त नहुष को शासन से च्युत किया था। वैतहव्य नामक अब्राह्मण को ब्राह्मणत्व प्रदान कर उसने गृत्समद नामक ब्राह्मणवंश का प्रारम्भ किया। च्यवन परशुराम सदृश श्रेष्ठ पुरुष भृगुवंश में उत्पन्न हुए थे। भृगुस्मृति, भृगुसंहिता, भृगुसिद्धान्त इत्यादि भृगुनिर्मित ग्रन्थ प्रसिद्ध हैं।

# अक्षम्यः ब्राह्मणः

❑ विष्णुदत्त जोशी

महाभारतकालस्य घटना एषा। पाण्डुपुत्रः युधिष्ठिरः धृतराष्ट्रपुत्रः दुर्योधनः च-एतयोः मध्ये युवराजः कः भवेत् ? एषा समस्या। समस्यायाः समाधानं कर्तुं सर्वेषां मतेन मन्त्रिणा विदुरेण एका परीक्षा आयोजिता। तस्यां परीक्षायां युधिष्ठिरः दुर्योधनः च परीक्षार्थिनौ आस्ताम्। सर्वे सभासदाः, मन्त्रिपरिषद्, न्यायशास्त्रस्य विशेषज्ञाः प्रजाः च धृतराष्ट्रस्य राजसभायाम् उपस्थिताः आसन्। सर्वेषां पुरतः परीक्षा आरब्धा। परीक्षकरूपेण आसीत् सम्पूर्णा राजसभा।

तस्मिन् एव समये केचन आरक्षकाः चतुरः युवकान् बद्ध्वा राजसभाम् आनीतवन्तः। नीतिज्ञः विदुरः उभौ परीक्षार्थिनौ उक्तवान् – ''अत्र भवन्तौ द्वौ एव परीक्षार्थिनौ। एतेषाम् अपराधिनाम् उचितं न्यायं कुरुताम्। तर्कसंगत – समुचित – न्यायेन एव भवतोः कश्चन एकः युवराजपदस्य कृते अर्हः भविष्यति।''

एतत् श्रुत्वा दुर्योधनः अधैर्येण अवदत् – ''अत्र किम् ? उच्यतां, कः अपराधः एतेषाम्? किं कृतम् एतैः युवकैः?'' इति।

बद्धान् अपराधिनः प्रति सङ्केतं कृत्वा नीतिज्ञः विदुरः वदति – ''एते चत्वारः एव अपराधिनः एकस्य युवकस्य हत्यां कृत्वा तस्य धनस्य अपहरणं कृतवन्तः। एतेषाम् उपरि अपराधः सिद्धः जातः। सम्प्रति एते न्यायार्थम् अत्र उपस्थिताः। भवन्तौ (युधिष्ठरदुर्योधनौ) द्वौ एव युवराजपदं प्राप्तुं प्रत्याशिनौ स्तः। एतेषां तर्कसंगतं समुचितं न्यायं कृत्वा स्वस्य न्यायनिपुणतां दर्शयताम्। भवतोः न्यायः एव अत्र प्रमाणम्। येन एते न्यायं प्राप्नुवन्तु, भवतोः अपि नीतिगतं ज्ञानं प्रकटितं भवतु।''

विदुरस्य वचनं श्रुत्वा अनुक्षणमेव दुर्योधनः उक्तवान्– ''एते सर्वे युवकाः। एते सर्वे परिश्रमं कर्तुं समर्थाः। परिश्रमम् अकृत्वा अपि एते कुमार्गे चलन्ति, एतान् दृष्ट्वा अन्ये सामाजिकाः जनाः अपि कुमार्गम् आश्रित्य व्यवहारं करिष्यन्ति। अतः एते जीवितुम् योग्याः न, अपितु मृत्योः योग्याः अतः शीघ्रमेव एतेषां सर्वेषां कृते मृत्युदण्डः दातव्यः। अस्माकं नीतिशास्त्रे अपि उल्लिखितं यत् यः निरपराधिनः हत्यां करोति, तेषां धनापहरणं च करोति, नृपः तस्य अपिराधिनः कृते मृत्युदण्डं दत्त्वा समाजं रक्षेत्।''

सभासदः दुर्योधनस्य न्यायं श्रुत्वा करताडनेन तस्य उत्साहवर्धनं कृतवन्तः। अनन्तरं महात्मा विदुरः उक्तवान्– ''युधिष्ठर। भवान् अपि नीतिशास्त्रानुसारम् एतेषां न्यायं करोतु, येन भवतः अपि नीतिज्ञता प्रकटिता भवेत्।''

सर्वान् सभासदान् प्रणम्य युधिष्ठिरः पृष्टवान्– ''सर्वप्रथमं अहम् एतेषाम् अपराधिनां नामानि वर्णं च ज्ञातुम् इच्छामि। अनन्तरं न्यायं कर्तुं प्रयत्नं करिष्यामि।''

दुर्योधनः उपहासपूर्वकं वदति ''अरे। न्यायेन सह वर्णस्य कः सम्बन्धः? एषः न्यायं कर्तुम् एव न जानाति अत्र सभायां भ्रमं जनयति।''

पितामहः भीष्मः अवदत् – ''वत्स दुर्योधन ! किमर्थं मध्ये व्यवधानं करोषि। सः यत् किमपि वदति तत् अवधानपूर्वकं श्रोतव्यम्। (युधिष्ठरं प्रति) आम्, वत्स युधिष्ठर ! यथा भवतः इच्छा तथा पृच्छतु।''

भीष्मः आरक्षकान् प्रति अवदत्– ''युधिष्ठिरस्य प्रश्नस्य उत्तरं दीयताम्।'' आरक्षकाः उक्तवन्तः– ''एकः अपराधी शूद्रजातीयः कर्मदासः, द्वितीयः वैश्यजातीयः प्रवीणः, तृतीयः

क्षत्रियजातीयः पृथ्वीपालसिंहः चतुर्थः च ब्राह्मणजातीयः सर्वज्ञकुमारः।''

आरक्षकाणाम् उत्तरं श्रुत्वा युष्ठिरेण न्यायः श्रावितः- ''कर्मदासस्य कृते पञ्चवर्षाणां सश्रमकारावासः, प्रवीणस्य कृते दशवर्षाणां कठोरकारावासः, पृथ्वीपालसिंहस्य कृते विंशतिवर्षाणां सश्रमकठोर-कारावासः तथा च सर्वज्ञकुमारस्य कृते सर्वेषां पुरतः अद्यैव अनुक्षणम् एव आचार्यद्रोणः दण्डनिर्धारणं करिष्यति यतोहि ब्राह्मणाय दण्डं दातुं मम अधिकारः नास्ति'' इति।

''हा हा हा हा कीदृशः न्यायः। अपराधः समानः किन्तु दण्डः भिन्नः भिन्नः। अत्र समानता कुत्र ? एषः तु न्यायशास्त्रस्य 'क ख ग' अपि न जानाति। धिक् एतं, यः वर्णं पृष्ट्वा न्यायं करोति।'' एवं दुर्योधनः उपहासपूर्वकं प्रलापं करोति।

''अलं प्रलापेन''। गुरुः द्रोणाचार्यः दुर्योधनं तर्जयित्वा युधिष्ठिरं प्रति वदति- ''वत्स, युधिष्ठिर! भवतः न्यायस्य विवेचना आवश्यकी। न्यायस्य विवेचनया एव सर्वासां शङ्कानां समाधानं भविष्यति।''

युधिष्ठिरः शान्तचित्तेन उक्तवान्- ''शूद्रजातीयः कर्मदासः अशिक्षाकारणात् संस्कारहीनताकारणात् च अज्ञानी अस्ति। अज्ञानवशात् एषः अपराधं कृतवान्। अतः कर्मदासस्य कृते पञ्चवर्षाणां सश्रमकारावासः दत्तः। वैश्यजातीयः प्रवीणः साक्षरः अस्ति, सर्वेषां पोषणम् अपि वैश्यस्य कार्यं भवति, तस्य ज्ञानम् अपि कर्मदासस्य अपेक्षया अधिकम्। सः ज्ञात्वा एव अस्मिन् कार्ये प्रवृत्तः। तस्य दोषः कर्मदासस्य अपेक्षया द्विगुणितः अतः तस्मै दशवर्षाणां कठोर-कारावासः दत्तः। क्षत्रियजातीयः सर्वेषां पालनाय रक्षायै च भवति। क्षत्रियः राजनीतिं पठित्वा सर्वेषां जनानां रक्षां करोति किन्तु एषः पृथ्वीपालसिंहः हत्या- लुण्ठनादिकार्येषु प्रवृत्तः। कर्त्तव्यात् विमुखः भूत्वा निन्दिते कार्ये संलग्नः। अतः एतस्य कृते विंशतिवर्षाणां सश्रमकठोर-कारावासः दत्तः। एषः ब्राह्मणः सर्वेषां जनानां गुरुः, सर्वेभ्यः कर्त्तव्याकर्त्तव्यस्य बोधं कारयति, एतस्य एव निर्देशनेन सर्वं राजकीयं कार्यं प्रचलति, एतस्य हस्ते एव सर्वा राजनीतिः, धर्मनीतिः, एषः एव भूसुरः अर्थात् भूमिदेवः, सम्पूर्णं राजतन्त्रम् अपि एतस्य आज्ञानुसारं प्रचलति यदि एषः एव अत्याचारं करिष्यति तर्हि समाजः सन्मार्गे कथं चलिष्यति? यदि एषः वदेत् अहं शिक्षितः नास्मि चेदपि एतस्य एव दोषः ज्ञानप्राप्त्यर्थम् एतेन प्राणपणेन प्रयत्नः करणीयः कारणं ज्ञानप्राप्तिः एव ब्राह्मणत्वम्, उक्तम् अपि- ब्रह्म जानाति इति ब्राह्मणः।''

**'शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च।**
**ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम्।।'**

ब्राह्मणानां शमः, दमः, तपः, शौचं, शान्तिः, आर्जवं, ज्ञानं, विज्ञानम्, आस्तिक्यम् इत्येतानि एव स्वभावेन ब्रह्मकर्माणि भवन्ति। एतानि कर्माणि विहाय एषः हत्यां लुण्ठनं च करोति, एतं दृष्ट्वा एव सर्वे जनाः स्वकर्त्तव्यस्य निर्धारणं कुर्वन्ति। यदि एषः ब्राह्मणः एव कुमार्गेण गमिष्यति तर्हि सम्पूर्णं राज्यं नष्टं भविष्यति। ब्राह्मणस्य अधोगतिः एतस्मात् कारणात् एव जायमाना अस्ति। एषः सर्वेषाम् अपेक्षया अधिकदोषी अस्ति अतः एतस्य कृते आचार्यद्रोणः सर्वेषां पुरतः अद्यैव अनुक्षणम् एव कमपि दण्डं चिन्तयतु। तदा एव समाजः स्वं रक्षितम् अनुभविष्यति'' इति। तस्मै कठोरतमो दण्डो दत्तः।

युधिष्ठिरस्य न्यायं श्रुत्वा सर्वे सभासदः उत्साहिताः प्रसन्नाः च भूत्वा प्रशंसां कृतवन्तः।

**राजस्थान-संस्कृत-अकादमी, जयपुरम्**

# कीदृशी शिक्षा अपेक्षिता

❑ डॉ. प्रतिभा शर्मा

''शिक्षयति या सा शिक्षा'' ''शकुं शक्तो भवितुमिच्छा शिक्षा'' चेति द्वे व्युत्पत्ती शिक्षा-शब्दस्य प्रदर्शिते। शब्दोऽयं योगरूढः। शिक्षाशास्त्रस्य प्रयोजनमुक्तमस्ति तैत्तिरीयो-पनिषदि यथा ''अथ शिक्षां व्याख्यास्यामः - वर्णः, स्वरः, मात्रा, बलं, साम, सन्तान इत्युक्तः शिक्षाऽध्यायः।'' एतत्तु केवलयुच्चारण-शिक्षाशास्त्रस्य विवेचनं वर्तते मानवजीवने शिक्षायाः पृथक् महत्त्वं विद्यते येन जीवनयापने सरलता आयाति। शिक्षा मानवे अन्तर्निहितानां शक्तीनां भावानां च जागरणं करोति। प्राचीनकाले वेदादिशिक्षा प्रसिद्धा आसीत् तथैव धार्मिक-शिक्षा, गार्हस्थ्यशिक्षा, राजधर्मशिक्षा, सामाजिकशिक्षा व्यायामशिक्षा अपि शिक्षायामेव गण्यते। प्राचीनकाले भारतीये समाजे चरित्र-निर्माणं, व्यक्तित्व-स्योन्नतिः, संस्कृतिसंरक्षणं सामाजिकधार्मिककर्त्तव्यानां परिपालनं च शिक्षायाः प्रधानोद्देश्यानि आसन्। स्मृतिग्रन्थेऽपि एतानि उद्देश्यानि सम्यक्तया प्रतिपादितानि सन्ति।

**देशधर्मान् जातिधर्मान् कुलधर्मांश्च शाश्वतान्।**
**पाषण्डगणधर्मांश्च शास्त्रेऽस्मिन्नुक्तवान्मनुः।।**

वर्तमानशिक्षाप्रणाल्यां केवलं भौतिकज्ञानस्यातिरेको दरीदृश्यते यतोहि शिक्षायां भौतिकवादितायाः दुष्प्रभावः शनैः शनैः वरीवर्द्धते। प्रतिस्पर्द्धायाः प्रभावः बालकानां मनसि कष्टमुत्पादयति येन नैराश्यभावनायाः प्रादुर्भावः सञ्जातः आत्महननस्य दुष्प्रभावोऽपि जन्येत। अनेन समाजे बहवः विकाराः विकसन्ते। सामाजिकसंरचनाऽपि दूषिता भवति। अत एव वर्तमानशिक्षायाः परिप्रेक्ष्ये नीतिशिक्षायाः प्रामुख्येन आवश्यकता अपेक्ष्यते। जीवनस्य संघटनाय जीविका-संघटनाय च कौशलमभीष्टम्। कौशलानां शिक्षोद्देश्ये सम्मिलितकरणाय अद्यैव महती आवश्यकता। अकुशला नीतिः किमिति सामाजिकं प्रयोजनं समुपकुर्यात्। एवंविधा नीतिस्तु समाजस्य क्षतिमेव घटयेदिति। साम्प्रतं वृत्तिमासादयितुं शिक्षायाः उपयोगः भवति। यद्यपि एवं प्रकारेण तु नीतिशिक्षायाः ह्रासः भविष्यति। नीतिशिक्षा अभावे समाजे दुराचारित्वं मिथ्याचारित्वं वा जनयेत्। एवम्भूतं जीवनं मानवमपि अमानवं विदध्यात्। अत एव नीतिशिक्षायाः स्थानं शिक्षाक्षेत्रे भवेत्। ''नैतिकशिक्षा'' इति नाम्ना पुस्तकेन सह सहगामिक्रियाविधिः च स्वीक्रियते पाठ्यक्रमे संस्कृत-वाङ्मये कानिचन वचांस्युपलभ्यन्ते यैः नैतिकशिक्षायाः समावेशाय प्रयासाः सन्दर्भाः च लक्ष्यन्ते यथा-

**सा विद्या या विमुक्तये ।**
**विद्या ददाति विनयम्।**
**नास्ति विद्यासमं चक्षुः।**
**ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति।**
**अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते।**

स्पष्टमेव यत् जीवनसंघटनार्थं नीतिशिक्षा अभीष्टा। नीतिशिक्षायां विनयः प्रासंगिको विषयो वर्तते। विनयेन शीलसच्चरित्रतादयो निखिला अपि सदगुणाः प्रादुर्भूताः भवन्ति। इमे सद्गुणाः मनुष्यस्य नैतिके व्यवहारे अन्तर्भवन्ति। आचारहीनः तु वैदिकफलमपि न प्राप्नुयात्। आचारयुक्तैव शिक्षा समग्रफलभागिनीति मनुस्मृतौ स्पष्टरूपेण कथितम् -

**आचारः परमो धर्मः श्रुत्युक्तः स्मार्त एव च।**
**तस्मादस्मिन्सदा युक्तो नित्यं स्यादात्मवान्द्विजः।।**

शिक्षा प्रत्येकं व्यक्तेः सर्वांगीणविकासं करोति। अत्र सर्वांगीणविकासस्य तात्पर्यं व्यक्तेः सामाजिक-नैतिक-चारित्रिकविकासः भवति। समाजे स्थित्वा शिक्षोद्देश्यस्य परिपालनं व्यक्तित्वविकासाय अपरिहार्यं भवतीति। एतदर्थं समाजे शिष्टाचारः, त्यागः, वीरता, सच्चरित्रता, सेवा, परोपकारश्चेत्यादीन् गुणान् सम्प्राप्य ग्रन्थेभ्यः संचित्य सर्वेषां सम्प्रदायानां सिद्धान्तान् विचारांश्च धार्मिक-शिक्षायाम् अन्तर्भाव्य अभिनवशिक्षां वयं आविष्कर्तुं शक्नुमः। यतोहि आधुनिकयुगे मानवजीवनमपि यन्त्रवत् दरीदृश्यते यत्र मानवीयभावानां चारित्रिकगुणानाञ्च अभावो वर्तते अत एव कतिपय गुणशिक्षा समावेशेन समाजस्य सुधारस्यापेक्षा वर्तते। क्रमेऽस्मिन् वेदानां, पुराणानां, धर्मशास्त्राणां, नीतिशास्त्राणाञ्च वर्तमानशिक्षायां समावेशनमपेक्षितम्। यथा-शिक्षाव्यवस्थायां मनुस्मृति-याज्ञवल्क्यस्मृति-नीतिशतक-भगवद्गीता-नैतिकशिक्षाग्रन्थानां समावेशनं कर्तुं शक्यते। ग्रन्थेऽस्मिन् वर्णितसिद्धान्ताः सर्वेभ्यः विश्वजनेभ्यः कल्याणकारकाः सन्ति। अनेन प्राप्तविद्यो मनुजः स्वयं जीवनं चरित्रं च संयतं करोति। विनयवान् पुरुषः सच्चरित्रस्तु भवेदेव। केवलं बाह्याचरणे श्रेष्ठता नात्र विनयं द्योतयति, अपितु मनसि बुद्धौ आत्मनि च शुद्धतां प्रकाशयति। समाजः सर्वदा विनयसम्बद्धां समस्यां सम्मुखी करोति। विद्यार्जनेन मनुष्यः सर्वमपि प्राप्नोति। यतोहि-

**विद्या ददाति विनयं विनयाद्याति पात्रताम्।**
**पात्रत्वाद्धनमाप्नोति धनाद्धर्मं ततः सुखम्।।**

आधुनिकशिक्षायां नीतिशिक्षायाः सर्वथाभावः तु नास्ति परं तत्र चंचलं मनः क्रमेण स्थिरतां धारयते इत्यस्य महती आवश्यकता। अध्यापकः मातृवत् पितृवत् मित्रवच्च भूत्वा सहानुभूत्या उदारतया च छात्रस्य कौतुकं जिज्ञासां च शमयति इत्यपेक्षितम्। अध्यापकस्य प्रतिभा शिक्षायाञ्च नीति-विषयक-वार्तां समायोजितां कृत्वा छात्रे विनयम् आविष्कर्तुम् शक्यते। छात्रस्य बाह्यविनयेन सह आन्तरिकविनयेन एकाग्रता सिद्ध्यति। अनया तस्य मनसि स्थिरताम् आधत्ते। पुस्तकस्य ज्ञानं पुस्तकीयज्ञानमात्रम् आदधानः छात्रः समाजे आदरं नाप्नोत्। यावत् छात्रस्य जीवने व्यावहारिकं ज्ञानं न भवति तावत् तस्य सर्वांगीणविकासस्य कल्पना नैव भवति। यदा शिष्येभ्यः शिष्टाचार-त्याग-वीरता-सत्य-सेवा-धर्म-सच्चरित्र-परोपकारादयः न शिक्ष्यन्ते तदा तेषां बौद्धिकक्षमतायाः सर्वांगीणविकासोऽपि न सम्भवेत्।

**येषां न विद्या न तपो न दानं, ज्ञानं न शीलं न गुणो न धर्मः।**
**ते मर्त्यलोके भुवि भारभूताः, मनुष्यरूपेण मृगाश्चरन्ति।।**

इदानीमपि बहवः शिक्षाकेन्द्राः गुरुकुलपद्धत्या प्रचलन्ति। यत्र पुस्तकीयज्ञानादतिरिक्तमपि आचारस्य विचारस्य संस्कारप्रधानशिक्षायाः विशिष्टं स्थानं वर्तते। यत्र मानवस्य कृते जीवनसंघटनाय नीतिः कौशलविषयकाः ज्ञानमभीष्टम् तत्र तु शिक्षायाः उद्देश्यं जीवनसंघटनमेव मूलरूपे भवति वृत्तेरासादनमेव न भवतीति। कथनस्य आशयः अयमस्ति यत् यदा सम्पूर्णविश्वं परिवाररूपेण भवति इत्यस्या भावनायाः सञ्चारः भविष्यति तदा शिक्षा सफलीभूता भविष्यतीति।

**अयं निजः परो वेति गणना लघुचेतसाम्।**
**उदारचरितानां तु वसुधैव कुटुम्बकम्।।**

वैश्वीकरणस्य अस्मिन् युगे वयं स्वार्थं परित्यज्य परार्थस्यैव अनुसरणं कुर्मः तदा शिक्षायाः वास्तविकोऽर्थः प्रस्फुटितः भवेत्।

**सर्वे भवन्तु सुखिनः, सर्वे सन्तु निरामयाः।**
**सर्वे भद्राणि पश्यन्तु, मा कश्चिद् दुःखभाग्भवेत्।।**

शोधच्छात्रा
(साहित्यविभागः) रा.सं.सं., जयपुरम्



# भारतीय-स्वतंत्रता-संग्रामे ''राष्ट्रपितुः'' महात्मागान्धिनः अवदानम्


❑ अर्चना शर्मा

अस्माकं प्राचीनर्वाचीनं साहित्यं संस्कृतभाषायामेव रचितमस्ति। भारतीय-स्वतंत्रता-संग्राम इति ऐतिहासिकः विषयोऽस्ति, किन्तु आधुनिक संस्कृतसाहित्ये पि कविभिः बहूनि काव्यानि रचितानि। तेषु महाकाव्येषु एतस्य विषयस्य अतिरुचिकरं वर्णनं प्राप्यते। अस्मिन् भारत-भूभागे अस्माकं जन्म अभवत्। अतः अयं भारतदेशः अस्माकं जन्मभूमिः अस्ति। मातृभूमिं प्रति अस्माकं विशिष्टानुरागो प्राणेभ्योऽप्यधिकः अस्ति, एतदेव राष्ट्रप्रेम इति कथ्यते। वयं जन्मभूमिं पूज्यां प्राणेभ्योऽधिकं प्रियतमां मन्यामहे। अनयैव भावनया स्वजन्मभूमिं प्रति राष्ट्रीयभावना, स्वदेशाभिमानो देशभक्तिश्च। जागृता भवति। अनेन देशभक्तिवात्सल्येन प्रेरिताः शूतशो महापुरुषाः शूराश्च प्राणान् तृणवन्मत्वा सर्वस्वं देशरक्षाणार्थं समर्पितवन्तः। वयं जानीमः यत् यस्मिन् देशे देशभक्तिधारा न प्रवहति, जन्मभूमिप्रेम न संचरति, तस्य देशस्य सामाजिकं जीवनं शुष्कं गौरवरहितञ्च भवति। इदम् अस्माकं कर्त्तव्यमस्ति यत् प्राणार्पणेनापि मातृभूमेर्हित-सम्पादनं कुर्याम्। इदमेवालक्ष्य महाकाव्ये मातृभूमिस्तुतिः गीयते।

**जन्मभूमिमथ स्वीयां, वन्दे भारतमातरम्।**
**जननीव सदाराध्या, जन्मभूमिर्मता सताम्।।**

सत्यमुक्तमिदं संघे महान् गुणः वर्तते। अनयैव भावनया वीराः संघटिताः भूत्वा स्वदेशस्य उन्नतिम् अकुर्वन्, यतोहि तत्समये यादृशं सामाजिकं राष्ट्रियञ्च जीवनमासीत्, तस्य निर्माणाय रक्षणाय स्वातन्त्र्या च संगठनं परमावश्यकमासीत्। ब्रिटिशसर्वकारस्य प्रभावेण जनेषु परस्परसौहार्दं, सौमनस्यं सहयोगश्च नष्टोऽभूत्। येन समाजोन्नतिः राष्ट्रोन्नतिर्वा स्वयमेव नष्टा जाता। तत्समये सर्वं दुराचरणं स्वार्थाचरणं च अदृश्यत। जनानां प्रभुत्वं क्षीयमाणम् अभवत्। ते कस्यापि कार्यस्य सम्पादनाय परमुखापेक्षिणः अभवन्। इत्थमेव अस्माकं देशस्य पारतन्त्रयम् एकतायाः अभावे बाधकं सञ्जातम्। इत्थं विचिन्त्य देशभक्तैः भारतीय समाजे सर्वत्र एकत्वभावोदयेन पराधीनतापाशस्य छेदनं विहितम्।

नराणां नायकः महात्मागाँधी विक्रमसंवत्सरे कार्तिक मासस्य कृष्णपक्षे प्रथमायां तिथौ तदनुसारं १८६९ तमे वर्षे अक्टूबरमासस्य द्वितीयायां तारिकायां काठियावाड-प्रदेशान्तर्गत पोरबन्दर नामक-स्थाने जनिमलभत। अस्य पितृवर्यस्य करमचन्द गान्धिनः जननी पुतलीबाई आसीत्। प्रारभ्भिकीं शिक्षां राजकोटे भावनगरे समवाप्य विधिशास्त्रस्य अध्ययनाय आंग्लदेशं गतः। भारतेदेशे ब्रिटिशानां दुर्व्यवहारं विलोक्य गाँधी सत्याग्रहम् अकरोत्।



सत्याग्रहस्य सफलतां विलोक्य भारतीयस्वान्त्र्य-आन्दोलने अघोषयत् यत् यथैव तृणमेकं तुच्छं भवति तथैव वयं सर्वे संघटिताः भूत्वा अहिंसामार्गेण आन्दोलनस्य नेतृत्वं करिष्यामः। गान्धिमहोदयः स्वतंत्रताऽऽन्दोलने आंग्ल-



शासकैः बहुवारं कारागारे निगडितः तेन अनेकानि कष्टानि विविधाश्च यातनाश्च अनुभूतास्तथापि दृढव्रती सत्याग्रहशीलश्चायं यशस्वी विरमितो नाभवत्। सत्य-अहिंसा अपरिग्रह-अस्तेयासहयोगदीनां गुणानां समावेशं कृत्वा पूर्णतया महापुरुषः सञ्जातः। 1942 तमे वर्षे ''अंग्रेजों भारत छोड़ों'' इत्याख्यान्दोलनं भारते समारब्धम्। एवं त्रिंशद्वर्षाणि यावत् कृतं जनान्दोलनं सफलमभवत्। 1947 तमे वर्षे अगस्तमासस्य पंचदशतारिकायां गान्धिमहोदयस्य सत्प्रयासैः अस्माकं भारतेन पूर्ण-स्वातन्त्र्यं प्राप्तम्। भारतस्य स्वतन्त्रताप्राप्ते रनन्तरं महात्मागान्धी विविधकार्यक्रमैः राष्ट्रसेवां कर्तुं प्रयत्नं कृतवान्। परं अस्माकं दौर्भाग्यात् 1948 तमे वर्षे जनवरी मासस्य त्रिंशत्तारिकायां सायंकाले षड्वादने प्रार्थनासभां गच्छन् महात्माऽयं नाथूरामगोडसे नाम्ना नृशंसेन गोलिकाघातेन हतः। महात्मनो गान्धिनः कृते भारतदेशः सर्वथा ऋणी स्थास्यति।

शोधच्छात्रा:
राजस्थान विश्वविद्यालय, जयपुरम्

---

**पुरस्कारपरावर्तिपुराणम्**

# कृकलासानां दायादाः

**डॉ. हर्षदेवमाधवः**

हे कृकलासानां दायादाः!
कति कति वर्णास्सन्ति वः ?
कति कति ऋतवः सन्ति वर्णपरिवर्तनार्थम्?
अतीते भव्यक्षणे
युष्माभिर्मस्तकं नमयित्वा,
नैकवारं प्रेक्षकेभ्यो नम्रतां प्रदर्श्य
स्वीकृताः पुरस्काराः।
स्वीकृत्युत्तरं भवतां यशोऽपि
प्रावृट्कालीननदवत्
वृद्धिं गतम्।
प्राप्तं सम्मानपदकं
वक्षःस्थलम् आरोप्य
स्थानं लब्धं वृत्तपत्रेषु।
एकस्मात् शिखरात्
पादन्यासः कृतोऽन्यशिखरेषु,
यत्र गगनमपि यूयं समीपमन्वभवत्।
सहसा
यथा पुरन्दरेण
अहङ्कारवशाद् दुर्वाससा दत्ता माला
अपि च ऐरावतेन पादेन मृदिता
तथैव
वाणी स्वातन्त्र्य-मदवशात्
सम्मानाः क्षिप्ताः
स्वगर्विष्ठग्रीवाभ्यः।
संस्कृतौ विकृतिदर्शनं कारयित्वा
देशान्तरेषु प्रतिष्ठां प्राप्य
यूयमनर्गलवाग्व्यवहारशृङ्गाघातं कृत्वा
जाता महिषकल्पाः।
देश-धर्म-संस्कार-संस्कृतिनिन्दापरायणा यूयं
जानीथ वर्णपरिवर्तनचमत्कारेण
सर्वमपि लब्धुम्।
गच्छत,
क्षिपत सर्वाण्यपि कण्ठाभरणानि...।
कण्ठाभूषणानि मुक्तिमनुभवन्ति दम्भात्।
वयमपि जानीमः
प्रकृतिं वः।

8, राजतिलक बंगलोज,
बोपल, अहमदाबाद

# 'किं वयं जानीमः' - स्वपरीक्षणं कुर्मः

❑ आचार्यमदनलाल शर्मा

1. संस्कृतसाहित्ये पुस्तकालयपरम्परायाः प्रारम्भो मन्यते –

(क) ऋग्वेदात् (ख) सामवेदात् (ग) यजुर्वेदात् (घ) उपनिषद्भ्यः ( )

2. चतुर्वर्गनाम्ना गण्यन्ते –

(क) वर्गाः (ख) वेदाः (ग) आश्रमाः (घ) पुरुषार्थाः ( )

3. सर्वप्राचीनं पुराणं किम् ?

(क) गरुडपुराणम् (ख) विष्णुपुराणम् (ग) वामनपुराणम् (घ) मत्स्यपुराणम् ( )

4. 'जाम्बवतीविजयम्' इति काव्यस्य प्रणेता कः ?

(क) पाणिनिः (ख) वररुचिः (ग) पतञ्जलिः (घ) अश्वघोषः ( )

5. बाणभटस्य रचना का?

(क) नीतिशतकम् (ख) चण्डीशतकम् (ग) सूर्यशतकम् (घ) वैराग्यशतकम् ( )

6. महाकवेः माघस्य जन्मस्थली वर्तते –

(क) जयपुरम् (ख) भरतपुरम् (ग) सांचोरनगरम् (घ) भीनमालः ( )

7. काव्यस्य प्रारम्भेऽन्ते च लक्ष्मी शब्दस्य प्रयोक्ता कविः कः ?

(क) भारविः (ख) माघः (ग) श्रीहर्षः (घ) कालिदासः ( )

8. पदलालित्यं कस्य कवेः प्रसिद्धम् ?

(क) कालिदासस्य (ख) बाणस्य (ग) दण्डिनः (घ) भारवेः ( )

9. 'लेनिनामृतम्' इति महाकाव्यस्य रचयिता कः ?

(क) विद्याधरशास्त्री (ख) पद्मादत्त शास्त्री (ग) मधुकरशास्त्री (घ) वासुदेवशास्त्री ( )

10. व्याकरणे सुप्तिङन्तं भवति –

(क) वर्णसंज्ञम् (ख) शब्दसंज्ञम् (ग) पदसंज्ञम् (घ) वाक्यसंज्ञम् ( )

व्याख्याता, श्री अशोकशर्मा राजकीय उच्च माध्यमिकविद्यालयः, लालसोट

1 (क) 2 (घ) 3 (ख) 4 (क) 5 (ख) 6 (घ) 7 (ख) 8 (ग) 9 (ख) 10 (ग)

# सांख्यकारिकायां गुणत्रयविवेचनम्

❑ डॉ. गीता शुक्ला

सांख्यकारिकायाम् आचार्य-ईश्वरकृष्णेन गुणानां स्वरूपं प्रयोजनञ्च निरूपितं यत् गुणाः सुखदुःखमोहात्मकाः भवन्ति। सांख्ये सत्त्वस्य रजसः तमसश्च संज्ञा 'गुण' इत्यस्ति।

**सत्त्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलं च रजः।**

सत्वगुणः लघुः प्रकाशकश्च अस्ति। रजोगुणः संश्लेषजनकः तथा सक्रियोऽस्ति। तमोगुणः भारयुक्तः आच्छादकश्च भवति।

एते त्रयो गुणाः परस्परविरोधिनः सन्तोऽपि पुरुष-प्रयोजनानुसारं प्रदीपवत् मिलित्वा कार्यं कुर्वन्ति।

एते गुणाः इतरेतराश्रयेणोपार्जितसुखदुःखमोहप्रत्यया इति सर्वे सर्वरूपाः भवन्ति।

गुणत्रयेषु परस्परम् उपमर्दनप्रवृत्तिरस्ति। अत एव एते विविधाकारं धारयन्ति। स्वस्वभावविपरीतं कार्यं कुर्वन्ति। केन प्रकारेण ईदृशं कार्यं कुर्वन्ति एते गुणाः ? अस्य प्रश्नस्योत्तरं वाचस्पतिमिश्रेण उक्तं यत् यथा काचित्-सुन्दरी स्वप्रियाय सुखं ददाति सपत्ये दुःखमाददाति अन्यकामिनं मोहं प्रददाति तथैव एते गुणाः अपि प्रवर्तन्ते।

योगभाष्येऽपि उक्तम्-एते गुणाः परस्पराश्रयणादेव सुखदुःखमोहान् अनुभवन्ति।

सत्वं सुखात्मकं रजोदुःखात्मकं तथा तमो मोहात्मकमस्ति।

**प्रदीपवच्चार्थतोवृत्तिः अस्यायमभिप्रायः -**

वर्तिकातैलम् अग्निश्च एते त्रयः परस्परविरोधिनः सन्ति। किन्तु यथायोग्यं सर्वे मिलित्वा प्रकाशनात्मकं कार्यं कुर्वन्ति तथैव गुणत्रयोऽपि परस्परं विरोधिनः सन्तोऽपि पुरुषप्रयोजनवशात् सम्मिल्य कार्यं कुर्वन्ति। एतेषां कार्यं प्रकाशात्मकं, क्रियात्मकं तथा प्रकाशक्रिययोः उभयोः प्रतिबन्धात्मकं तथा परस्परं तिरस्कारात्मकं परस्पर-माश्रयात्मकं परस्परं समुद्भवनात्मकं तथा परस्परं संयोग-स्वभावात्मकं चास्ति।

**प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः।**
**अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः।।**

प्रीत्यप्रीतिविषादम् उपलक्षणमात्रमस्ति। (सांख्यकारिका 12)

प्रीतिशब्दात् आर्जवं, मृदुता, कोमलता, लज्जा, सन्तोषः, श्रद्धा, क्षमा, अनुकम्पा तथा विवेक इत्यादीनां ग्रहणं भवति।

अप्रीतिपदात् द्वेष-द्रोह-मत्सर-निन्दा-पराभवादि-समस्त-दुःखदभावानां ग्रहणं भवति।

विषादपदात् विप्रलम्भ-भय-कुटिलता-कृपणतादि-मोहप्रदभावानां ग्रहणं भवति।

उक्तञ्च सांख्यसूत्रे **प्रीत्यप्रीतिविषादाद्यैर्गुणानामन्योन्यं वैधर्म्यम्।** (सांख्यसूत्रम् 1-127)

पञ्चशिखाचार्येणापि प्रीत्यप्रीतिविषादशब्देभ्यः केवलं सुखदुःखमोहानामेव ग्रहणं न कृतम् अपितु सात्वस्य गुणस्य प्रसाद-लाघव-प्रीति-तितिक्षासन्तोषादिभेदाः अपि स्वीकृताः सन्ति। अत एव सत्वगुणः सुखात्मकः भवति।

रजोगुणस्वभावोऽपि शोकादिनैकप्रकारको भवति।

तमोगुणस्यापि निद्रादि नानाभेदाः सन्तोऽपि मोहात्मक-मिति संक्षेपेण कथनमात्रम्।

एकेन अन्येन विग्रहेण प्रीतिः दुःखाभावादतिरिक्तं भावात्मकं किमप्यन्यद् वस्तु नास्ति। यदि प्रीतिः दुःखाभावात्मिका दुःखं च प्रीत्यभावात्मकं स्वीक्रियते तर्हि उभयत्र अन्योन्याश्रयदोषागमनात् उभयोः कस्यचिदपि सिद्धिर्न-भविष्यति।

अतः भावात्मकौ एतौ उभाविति स्वीक्रियताम्।

प्रीत्यप्रीतिविषादात्मकाः इत्यत्र आत्मपदस्य अर्थः स्वरूपमस्ति न तु स्वभावः।

सांख्यकारिकायां आचार्येश्वरकृष्णेन गुणत्रयविशेषणम् उक्तम्- 'प्रकाशप्रवृत्तिनियमार्थाः विशेषणेनानेन ईश्वरकृष्णेन गुणानां प्रयोजनं निरूपितम्।'

सत्वगुणस्य प्रयोजनं प्रकाशनात्मकमस्ति। रजसः प्रवृत्यात्मकं तमसश्च नियमनात्मकम्। गौडपादाचार्यस्य कथनानुसारं प्रकाशप्रवृत्तिनियमार्थाः इत्यस्मिन् 'अर्थः' इति पदं सामर्थ्यबोधकमस्ति। (अर्थशब्दः सामर्थ्यवाची) तेन सत्वं प्रकाशार्थम् अर्थात् प्रकाशोत्पादने समर्थम्, रजोगुणः प्रवृत्तौ समर्थोऽस्ति तमोगुणश्च स्थितौ समर्थोऽस्ति, इत्यर्थः सञ्जायते।

सांख्यकारिकायां गुणानां कृते तृतीयं विशेषणं- गुणवृत्तिव्यापारनिरूपणाय कृतमस्ति-

**'अन्योन्याभिभवाश्रयजननमिथुनवृत्तयः इति'**

विशेषणपदेऽस्मिन् आदौ एवं अन्ते 'अन्योन्य' इति पदस्य वृत्तीति पदस्य च मध्यवर्तिप्रत्येकपदेन सह सम्बन्धः भवति। इत्येवं प्रकारेण चतसृणां क्रियाणाम् अभिधानं अस्त्यस्मिन् पदे- (1) अन्योन्याभिभववृत्तयः (2) अन्योन्याश्रयवृत्तयः (3) अन्योन्यजननवृत्तयः (4) अन्योन्यमिथुनवृत्तयः।

अभिभवः अर्थात् तिरस्कारः केनापि एकेन गुणेन अन्ययोः द्वयोः तिरस्कारो भवति। यथा सत्वगुणो रजोगुणं तमोगुणञ्च तिरस्कृत्य घोरवृत्तिमुत्पादयति। एवम् एव तमोगुणोऽपि सत्वगुणं रजोगुणं च अभिभूय मूढवृत्ति-मुत्पादयति।

श्रीमद्भगवद्गीतायामपि स्पष्टमुक्तं -

**रजस्तमश्चाभिभूय सत्त्वं भवति भारत।**

**रजः सत्वं तमश्चैव तमः सत्त्वं रजस्तथा। ( श्रीमद्भगवद्गीता 14/10 )**

सत्त्वगुणः प्रवृत्तिं नियमनं चाश्रित्य स्वप्रकाशद्वारा रजस्तमसोः उपकारं करोति। रजोगुणश्च प्रकाशं नियमनं चाश्रित्य सत्त्वतमोगुणौ उभावपि प्रवर्तयति। एवमेव तमोगुणश्च प्रकाशप्रवृत्तिञ्चादाय स्वनियमनक्रियया सत्त्वरजसोः सहायतां करोति। अर्थात् सत्त्वगुणः स्वयमेव प्रवर्तको नास्ति अपितु तद्धर्मप्रकाशस्य प्रवृत्तिः रजोगुणस्य धर्मभूतां गतिमादाय एव भवति। एवमेव रजोगुणे प्रकाशाभावात् तस्य प्रवृत्तिः सत्त्वगुणस्य प्रकाशमादाय भवति। तमोगुणोऽपि स्वयमेव प्रवर्तको भवितुं नार्हति अपितु रजोगुणस्य धर्ममादाय एव सः नियमेन प्रवृत्तो भवति। एवं प्रकारेण गुणानां परस्पराश्रयणप्रक्रिया गौणतया भवति न तु मुख्यतया।

गुणत्रयेषु कश्चिदेकः अपरस्य उत्पत्तेः कारणं भवति। जननशब्दादत्र परिणामो गृह्यते न तु उत्पत्तिः। यतोहि गुणत्रयेषु यद्येकम् अपरस्योत्पत्तिकारणं स्वीक्रियते तर्हि सांख्यस्य सत्कार्यवादस्य सिद्धान्त एव विखण्डितो भविष्यति। परिणामाः गुणानुरूपाः एव भवन्ति। गुणानुरूपाऽवस्था च गुणत्रयाणां साम्यावस्थारूपः प्रधाननामकः परिणामः। अस्याम् अवस्थायां गुणत्रयेषु परस्परं हेतुत्वं न भवति अर्थात् एतेषु कश्चिदपि अपरस्य कारणं हेतुर्वा भवितुं न शक्नोति।

गुणत्रयमेतत् स्त्रीपुरुषाविव परस्परं मिथुनीभावं प्राप्य कार्यं कुर्वन्ति। एतेषां पारस्परिकसम्बन्धः अविनाभावरूपः। यत्र एक अस्ति तर्हि अपरस्य अप्रतीतावपि तस्य कल्पना कर्त्तव्या एवं अत्र अयमेव सारांशः यत् एते त्रयो गुणाः परस्परं मिथुनीभावेन कार्यं कुर्वन्ति तथा सर्वेऽपि सर्वत्रगामिनः।

सत्वगुणः रजोगुणसहचारी रजोगुणश्च सत्वस्य सहचारी तथा एतौ उभौ तमोगुणसहचारिणौ स्तः। एतेषां योगः अपि अनादिः तथा एतेषां परस्परवियोगः अपि कदापि न संभाव्यते। पुरुषेण सह तु गुणत्रयाणां संयोगो वियोगो भवति (गुणाः पुरुषैः सह संयोगविभागवन्तः इति वाचपतिमिश्रः)। किन्तु परस्परमेतेषां संयोगो न जायते न तु विभागः अपि।

**एसो.प्रो. संस्कृत-विभागः, भ.दी.आ.का.स्नातकोत्तर-महाविद्यालयः, लखीमपुर-खीरी**

# महाभारते मानवाधिकारः

❑ रमेशचन्द्रबुनकरः




महाभारते मानवाधिकार इति विषयं स्वीकृत्य विवृणोमि किञ्चिदत्र। तत्र महाभारते मानवाधिकारविषयचिन्तनं बहुधा विलोक्यते अस्माभिः। विचाराभिव्यक्तेः, उपासना पद्धतेः नेतृचयनस्य स्वतन्त्रतापरकविचाराः तत्र विद्यन्ते। जीवने अधिकारं बिना शून्यत्वमागच्छति। जीवननिर्माणकालस्य प्रथममिदं सोपानम्। अधिकारं बिना असहायो भूत्वा नरः आत्मनः कर्म अपि त्यजति, विवेकशून्यो भूत्वा आत्मानं धिक् मन्यते सः। मानापमानयोः तस्य जीवने चिन्तनमेव न भवति। अतो जीवनस्य सर्वाङ्गीणविकासाय अधिकाराः नूनमेव अनिवार्याः। एतत्सर्वमेवाङ्गीकृत्य प्रोच्यते लास्कीमहाशयेन-

अधिकारः सामाजिकजीवनस्य तत्त्वमस्ति यं बिना कोऽपि स्वव्यक्तित्वस्य विकासायात्मानं दीनदीनमक्षमं मनुते किन्तु सम्पूर्णस्याधिकारस्यास्तित्वं समाजे एव निहितमस्ति। अतः तदनुमतिं विना मानवो यासां शक्तीनाम् उपयोगं विधत्ते ताः सर्वाः प्राकृतशक्तयो भवन्ति किन्तु यदा अन्योन्य-हितसाधनं भवेत् तदा मानवाधिकाररक्षा स्वत एव सञ्जायते।

अत एवोच्यते महाभारते भगवता वेदव्यासेन-

**श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यताम्।**
**आत्मनः प्रतिकूलानि परेषां न समाचरेत्।।**

परेभ्यो नाचरणीयं यत् स्वात्मानं प्रतिकूलमित्येव मानवाधिकारः। मानवाधिकारस्येयम् उदात्त-संकल्पना, भावना च ''परोपकारः पुण्याय पापाय परपीडनमिति'' अत्रापि मानवकल्याणमेव प्रमुखम्।

वेदादारभ्य इदानीं यावत् समेऽपि संस्कृतग्रन्थाः ख्यापयन्ति मानवाधिकारान्, वर्द्धयन्ति च मानवाधिकार-गौरवभूमिम्।

मानवाधिकाररक्षायै अस्माकं समेषां चित्तं मनो हृदयञ्च एकीभवत्विति ऋग्वेदे विधीयते काचित् प्रार्थना-

**समानी वः आकूतिः समाना हृदयानि वः।**
**समानमस्तु वो मनो यथा वः सुसहासति।।**

**( ऋ. 10/191/24 )**

मानवो यदा स्व स्वकर्तव्यं मनसा वचसा कर्मणा निभालयिष्यति तदैव मानवाधिकाररक्षा जायेत-

उच्यते वेदेषु -

**उत्तिष्ठ ब्रह्मणस्पते देवान् यज्ञेन बोधय।**
**आयुः प्राणं प्रजाः पशून् कीर्तिं यजमानस्य वर्धय।।**

अनुशासनपर्वणि युधिष्ठिराय भीष्मोपदेशा मानवा-धिकाररक्षार्थमेवोपदिष्टाः -

**कायेन त्रिविधं कर्म वाचा चापि चतुर्विधम्।**
**मनसा त्रिविधं चैव दश कर्मपथांस्त्यजेत्।**

मानवाधिकारस्य सफलोऽयमुपदेशः प्रदाय भीष्मेन मानवाधिकारस्य संकल्पना साक्षात्कृता पुरस्कृता चेयं महती परम्परा।

मानवस्य निखिलानामुपादानानां सुरक्षा संरक्षा एव मानवाधिकारश्रेण्यां समागच्छन्ति। मानवमात्राय धर्म-अर्थ-काम मोक्षचतुर्णां पुरुषार्थाणां व्यवस्थापि मानवाधिकार-शिक्षायाः सफलतमम् उदाहरणम्। भारते धर्माचरणस्य स्वतन्त्रता निगदिता महाभारते-

**वरणे स्वेष्टमार्गस्य स्वधर्म-परिपालने।**
**अभिसन्धिं विहायैव स्वतन्त्राः सर्वमानवाः।।**

सर्वेऽपि मानवाः स्वतन्त्राः आसन्। स्वतन्त्रताया अधिकारस्य कियतीयम् उदात्तसंकल्पना।

यथा राजा तथा प्रजेति श्रूयते काचिद् परिपाटी। राज्ञः अप्यासन् स्वकर्तव्यानि। ये जनाः जीविकोपार्जनेऽक्षमाः तान्

निर्वाहयति स्म राजा महाभारतसमये। दीन-हीन-विकलाङ्ग-अनाथादयः जनाः श्रेण्यामस्यामागच्छन्ति स्म। तेषां जीवननिर्वाहस्य व्यवस्था राज्यप्रशासनद्वारा क्रियते स्म।

शान्तिपर्वणि वक्ति भगवान् वेदव्यासः-

**अभृतानां भवेत् भर्ता भृतानामन्वेक्षकः।**
**नृपतिः सुमुखश्च स्यात् स्मितपूर्वाभिभाषिता।।**
**(शान्तिपर्व 27/19)**

सर्वदैव राजा प्रसन्नवदनो भूयात् स्मितेनैव वार्तालापः करणीयः तेन इत्यपि समुल्लिखति महाभारते द्वैपायनमुनिः -

**उपासिता च वृद्धानां जितेन्द्रियलोलुपः।**
**सतां वृत्ते स्थिरमतिः। संतोष्यश्चारुदर्शनः।।**
**(शान्तिपर्व 57/20)**

वृद्धपुरुषान् राजा सेवेत, आलस्यं लोलुपतां च परित्यज्य प्रजापालनं सः कुर्यात्। सत्पुरुषसंसर्गे व्यस्तो भूयात् सः। महाभारते पदे पदे संलक्ष्यन्ते मानवाधिकाराः। दीनानां, अन्धानां कृपणानां च कृते सर्वाः व्यवस्थाः कल्पिताः आसन्।

**दीनान्धकृपणानां च गृहाच्छादनभोजनैः।**
**आनृशंस्यपरो राजा चकारानुग्रहं प्रभुः।।**
**(शान्तिपर्व 42/11)**

विचाराभिव्यक्तिस्वतन्त्रताऽपि मानवाधिकारेऽन्तर्भवति। विचाराभिव्यक्तेः स्वतन्त्रताऽपि आसीत् तस्मिन् युगे। आदिपर्वणि पाण्डवान् प्रति धृतराष्ट्रस्य दुर्नीतिं विरुल जनता प्रत्यक्षत्वेन विरोधं निन्दाञ्च करोतिउच्यते तत्र-

**''गतानेतान् विदित्वा तु पौराः शोकाभिपीडिताः।**
**गर्ह्यन्तोऽसकृद् भीष्मविदुरद्रोणगौतमान्।।**
**ऊचुर्विगतसंत्रासाः समागत्य परस्परम्।।''**

दुर्योधनो गुरुद्वेषी, दुर्जनः, कलहप्रियः अभिमानी च वर्तते इति कृत्वा प्रजाः सर्वाः तेभ्यः कृत्येभ्यः दुःखिताः भूत्वाऽन्यत्र कुत्रापि गन्तुं समीहन्ते - मानवाधिकारेषु वर्तते। यत्र अन्यायः, शोषणं कदाचारप्रभृतयः दुर्वृत्तयः सन्ति तत्र एकीभूय संघर्षो विधातव्य इति।

**नेयमस्ति मही कृत्स्ना यत्र दुर्योधनो नृपः।**
**साधु गच्छामहे सर्वे यत्र गच्छन्ति पाण्डवाः।।**

मानवाधिकारशिक्षायाः सन्दर्शनानि महाभारते बहुशः प्राप्यन्ते। भारते शिक्षायाः उच्चस्वरूपमासीत्। शिष्यस्य उपनयनसंस्कारं विधाय गुरुः पाठयति स्म। गुरुशिष्ययोः आसीत् कश्चित् मधुरसम्बन्धः उच्यते शास्त्रेषु-

**उपनीय तु यः शिष्यं वेदमध्यापयेद् द्विजः।**
**सकल्पं सरहस्यञ्च तमाचार्यं प्रचक्षते।।**
**एकदेशन्तु वेदस्य वेदाङ्गान्यपि वा पुनः।**
**योऽध्यापयति वृत्यर्थम् उपाध्यायः स उच्यते।।**

अध्ययनविषये प्रोक्तमासीत्-

**न वेदपाठमात्रेण सन्तोषं कारयेत् बुधः।**
**पाठमात्रावसाने तु पङ्के गौरिव सीदति।।**
**यथा पशुर्भारवाही न तस्य लभते फलम्।**
**द्विजस्तथाऽर्थानभिज्ञो न वेदफलमश्नुते।।**
**योऽधीत्य विधिवद् वेदं वेदार्थं न विचारयेत्।**
**स सान्वयः शूद्रसमः पात्रतां न प्रपद्यते।**
**अधीत्य यत्किञ्चिदपि वेदार्थाधिगमे रतः।**
**स्वर्गलोकमवाप्नोति धर्मानुष्ठानं विद्धि सः।।**

वेदानध्याप्य गुरुः शिष्यं कथयति - मानवकल्याणाय, मानवाधिकाराय इमे वेदाः प्रयोक्तव्याः। वेदज्ञानं तत्रैव प्रयोक्तव्यं भवता यत्र मानवाधिकारो निहितो भवेत्।

तस्मिन् काले आसीत् शिक्षा मानवस्य मूलाधिकारः। अध्ययनं नितान्तम् आवश्यकमासीत्। विष्णुपुराणे प्रोक्तम्-

**अनाश्रमी न तिष्ठेत क्षणमात्रमपि द्विजः।**
**आश्रमेण विना तिष्ठन् प्रायश्चित्तीयते द्विजः।**

एतादृश्यस्माकं शिक्षा-

सत्यं वद, धर्मं चर, स्वाध्यायप्रवचनाभ्यां मा प्रमदितव्यम्, मातृदेवो भव, पितृदेवो भव, अतिथिदेवो भव।

मानवाधिकारस्य सन्ति नैकानि तत्त्वानि। यानि सत्यमक्रोधः शौचमिन्द्रियनिग्रहः धीर्विद्याप्रभृतयो येषां प्रतिपालनेन संरक्षणेन, आचार-विचारेण मानवसुरक्षा मानवाधिकाररक्षा च सुष्ठुतया जायते।

**शोधच्छात्रः**
जगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृतविश्वविद्यालयः,
जयपुरम्

# भारती

❑ डॉ. राजकुमार मिश्रः

यस्या आश्रयमाप्य काव्यसरणौ सन्तोऽपि दीना जनाः
ख्यातिं काममपि भेजिरेऽधिवसुधं वाचाऽप्रकाश्यां पराम्।
पार्श्वे भाति यदीयदृष्टिवशतः तत्त्वं हि तद् दूरगं
सा नोऽन्तस्तिमिरं हरेन्निजगुणैर्लोकप्रिया भारती।। 1।।

अज्ञानान्धतमो जगत्परिगतं लोकैकताध्वंसकं
हर्तुं मानवतारसं रचयितुं यस्या वलन्ते कलाः।
व्यापारो बुधसेवितोऽपि न कदा यस्याः समाप्तिं गतः
सेयं सम्प्रति भाति सम्प्रति सुधाधाराधरा भारती।। 2।।

भृङ्गास्ते मकरन्दपानमुखराः पद्मेषु मात्रे दिने
आगच्छन्तु पतन्तु यावदिह नाऽस्तं भास्करो याति सः।
यस्याः पादसरोरुहं विकसितं भूत्वा स्वतोऽनारतं
मूर्च्छामात्मनिवासिनां हरति सा गन्धैः जयेद् भारती।।3।।

यद् यल्लोकनिरादृतं विधिहतं वस्तु स्थितं भूतले
तत्तच्चोच्चपदं प्रयाति सहसा यस्याः कटाक्षैः शुभैः।
यद् वाऽदृश्यमपीह बुद्धिविषयं यातं कदाचिन्न यत्
तद् यस्याः कृपया भवेत् प्रकटितं सा भातु नो भारती।।4।।

यत्सृष्टौ डयतेऽम्बरे स्वहृदये कृत्वोन्नतो मेघराट्
भार्यावञ्चितविग्रहस्य सततं यक्षस्य वृत्तं शुभम्।
नायातोऽस्त्यधुना सखा स कुशलो हा हाऽलकातः कुतः
स्तब्धोऽद्यापि नभः प्रपश्यति जनो यत्र प्रिया भारती।।5।।

उद्यानं विविधैस्सुमैर्मधुमयैश्छायाप्रधानद्रुमै-
र्यस्याः सद्गुणदायकैर्नवनवैर्दिव्यैः फलैश्शोभते।
स्वीयोपस्थितिहेतुनाऽनवरतं ज्योतिःप्रकाशोऽमलः
सा मां धाम नयेन्निजं स्वकृपया हंसासना भारती।। 6।।

यत्सम्प्राप्तिकृते मया चलमनो नान्यत्र सम्प्रेषितं
लीनो नैव कदाप्यसाधुजनिते लोकप्रपञ्चेऽभवम्।
यद्वीणातलनिर्गतो नवनवो रागोऽनुरागाश्रयैः
श्रोतुं शक्यत एव नान्यविधिना सा पातु मां भारती।।7।।

शब्दार्थात्मकमस्ति सौरभवपुश्चौचित्यमास्ते पटो
रीतिश्चाङ्गिकविस्तृतिर्ध्वनिनयो वागस्ति यस्याः परा।
वक्रोक्तिः हसनं प्रफुल्लमनसा सालङ्कृतिर्भूषणं
सुव्यक्तो हृदयाशयोऽखिलरसाः सा भ्राजतां भारती।।8।।

दिव्ये हेममये नियोज्य पृषतान् शब्दार्थवारां घटे
तीर्थोपाधिसमान् सुगन्धसहितान् सौभाग्यपूर्णाऽऽस्थया।
उत्थायाऽनुदिनं समस्तकवयो ब्राह्मे मुहूर्तेऽनघे
नित्यं यां स्नपयन्ति काव्यसुधया सा द्योततां भारती।।9।।

विद्वद्हंसगणैरुपासितपदं पद्मैः परागप्रदैः
नम्रैस्तैः तटवर्तिकल्पतरुभिः शृङ्गारमालायितम्।
शब्दार्थाऽमृतधारयाऽतिवितितं यस्याः सदा दृश्यते
पूर्णं काव्यसरोवरं जयतु सा विद्याविभा भारती।। 10।।

(सहायकाचार्यः, साहित्यविभागः)
हरियाणा-संस्कृत-विद्यापीठम्, बघौला
पलवलम् (हरियाणा) 121102

नारी-स्तम्भः

# उद्धरेदात्मनाऽऽत्मानम्

❑ डॉ. राजेश्वरी भट्टः

महिलासशक्तीकरणं राष्ट्रविकासयोजनासु एकतमा प्रमुखा योजना वर्तते। राष्ट्रस्य अर्द्धाङ्गं कथं सुशक्तं आत्मनिर्भरञ्च भवेत् कीदृशैरुपायैर्भारतीयनारी अतीतस्य गौरवमाप्नुयाद् अस्यां दिशायां सर्वकारः सहैव स्वचालितसंस्थाश्च सततं प्रयत्नशीलाः सन्ति। जागरूकैः संस्थानैरेभिर्नारीणाम् आत्मनिर्भरतां दृढीकर्त्तुं बह्वीनां आर्थिक शैक्षिक-सामाजिक विकासमूलानां योजनानां क्रियान्वितिः क्रियते। अस्मिन् सन्दर्भे राजस्थानप्रदेशस्य राजधान्यां जयपुरनगर्यां शासनतन्त्रे, उच्चा-पदेष्वासीनानां, नारीकल्याणकृते कृतसंकल्पानां, नारीणां भूमिका प्रशस्यतरा उल्लेखनीया च वर्तते। प्रबुद्धाभिराभिर्नारीभिः समुचितशिक्षादीक्षयोरभावेन पराश्रितानां नारीणां आत्मनिर्भरतायै एका नारीकल्याणमयी संस्था संस्थापिता। संस्थायाः सदुद्देश्येन प्रेरणामधिगम्य सर्वकारे विभिन्नविभागेषु उच्चपदेष्वासीनाभिः 250 महिलाभिः संस्थायाः सदस्यता स्वीकृता। आत्मनः संकल्पं साधयितुं इमाः प्रबुद्धा नार्यो जयपुर नगरस्य पूर्वराजधान्यां आमेरनगर्यां स्थितं नांगलग्रामं स्वकर्मभूमिरूपेणाचिन्वन्। अस्मिन् ग्रामे ग्रामवासिमहिलानां सुविकासाय आत्मनिर्भरतायै च महिलाविकासपराणां कार्यक्रमाणां सञ्चालनेन संस्थायाः प्रयासेन जागृतिर्विहिता। महिलाकल्याण-कारिसंस्थायाः सहयोगेन नैका महिलाः साक्षरा आत्मनिर्भराश्च जाताः। संस्थाया लक्ष्यं न केवलं पुस्तकीयज्ञानस्य प्रसारो वर्तते अपितु वस्त्राणां सीवनम्, कर्त्तनम्, सौन्दर्यीकरणं प्रशिक्षणं गृहोद्योगस्य सञ्चालनमित्यादिभिर्व्यवसायान्मुखीभिः कार्यक्रम-आयोजनाभिर्महिलानामार्थिकं सशक्तीकरणं वर्तते। संस्थाया आर्थिकविकासाय संस्थायाः सञ्चालिकाभिः देशविदेशेषु सम्पर्कः साधितः। नांगलग्रागे संस्थापितायां संस्थायां नारीणां समुन्नयनाय ग्रामे तकनीकी शिक्षाऽपि सुलभा वर्तते। अत्र पंचायतकार्यालये कम्प्यूटर-प्रशिक्षणमपि नारीणां सुविधायै उपलब्धमस्ति। बालकानां नारीणाञ्च कृते पुस्तकालयस्य व्यवस्थाप्यत्र विहिता वर्तते। एतदतिरिक्तं नारीणाम् आत्मनिर्भरतायै भिन्न-भिन्न क्षेत्रेषु उपयोगिनः कार्यक्रमा आयोज्यन्ते। गौरवस्य हर्षस्य च विषयोऽयं वर्तते यत् परस्परं जाति-वर्ण-वर्गादीनां भेदभावं विस्मृत्य समाजस्य सम्मान्याः सहृदयाः, सम्पन्नाः, गुणवत्यो नार्यः ग्रामवासिनीनां अज्ञानां नारीणां आत्मोद्धाराय संकल्पवत्यः सन्ति। संस्थाया अध्यक्षा श्रीमती कमलशेखावतमहोदया सम्प्रति राज्यसर्वकारे अतिरिक्तपुलिस अधीक्षिका पदे कार्यरता वर्तते। अन्या अपि शासनतन्त्रे न्यायविभागे पुलिसविभागे च उच्चपदानि विभूषयन्ति। नूनं नारीभिः नारीणाम् आत्मोद्धाराय विहितोऽयं प्रयत्नः नारीणां कृते कल्पवृक्ष इव फलदाय को भविष्यति।

**हिन्दी अनुवाद :-**

महिला सशक्तीकरण राष्ट्र की विकासमूलक योजनाओं में प्रमुख योजना है। राष्ट्र का अर्द्धाङ्ग कैसे सुशक्त एव आत्मनिर्भर बने किन उपायों से भारतीय नारी अतीत के गौरव से गौरवान्वित होगी ? इसी दिशा में सरकार एवं स्वचालित संस्थाएँ प्रयत्नशील हैं। अनेक जागरूक संस्थानों के द्वारा नारी की आत्मनिर्भता को दृढ करने के लिए अनेक आर्थिक-शैक्षिक एवं सामाजिक विकास सम्बन्धी योजनाओं की क्रियान्विति हो रही है। इस सन्दर्भ में राजस्थान प्रदेश की राजधानी जयपुर नगरी में शासनतन्त्र में उच्चपदों पर आसीन, नारियों के कल्याण के लिए कृतसंकल्प, नारियों की भूमिका

अत्यन्त प्रशंसनीय एवं उल्लेखनीय है। इन प्रबुद्ध नारियों के द्वारा समुचित शिक्षा दीक्षा के अभाव में पराधीन रहने वाली महिलाओं की आत्मनिर्भरता के लिए एक नारीकल्याणकारी संस्था की स्थापना की गई है। संस्था के सत्संकल्प से प्रेरणा प्राप्त कर सरकार में भिन्न विभागों में उच्चपदों पर आसीन प्राय: 250 महिलाओं ने संस्था की सदस्यता स्वीकार की है। अपने संकल्प को सिद्ध करने के लिए इन विशिष्ट नारियों ने जयपुरनगर की पूर्व राजधानी आमेर में स्थित नांगल ग्राम को अपनी कर्मभूमि के रूप में स्वीकृत किया है। इस गाँव में ग्रामवासिनी महिलाओं के सुविकास एवं आत्मनिर्भरता के लिए महिला विकास परक अनेक कार्यक्रमों के माध्यम से महिलाओं में जागृति एवं चेतना उत्पन्न करने का प्रयास किया गया है। महिला कल्याणकारी इस संस्था के सहयोग से अनेक महिलाएँ साक्षर एवं आत्मनिर्भर हो रही हैं। संस्था का लक्ष्य केवल पुस्तकीय ज्ञान का प्रसार ही नहीं है अपितु वस्त्रों की सिलाई, कढाई, सौन्दर्यीकरण का प्रशिक्षण गृह उद्योगों का सञ्चालन इत्यादि व्यवसायोन्मुखी कार्यक्रमों के माध्यम से महिलाओं का आर्थिक विकास के लिए सञ्चालिकाएँ देश-विदेश में सम्पर्क करने में भी पीछे नहीं हैं। नारी समुन्नयन के लिए नांगल गाँव में तकनीकी शिक्षा भी सुलभ है। नांगल गाँव के पंचायत कार्यालय में नारियों की सुविधा के लिए कम्प्यूटर प्रशिक्षण की व्यवस्था भी उपलब्ध है। नारियों एवं बालकों के लिए नांगल में पुस्तकालय की व्यवस्था भी की गई है इसके अतिरिक्त नारियों के आत्मविकास के लिए भिन्न-भिन्न क्षेत्रो में उपयोगी कार्यक्रमों का आयोजन किया जाता है। हर्ष एवं गौरव का विषय है कि परस्पर जाति-वर्ण-वर्गादि भेदभावों को भूलकर समाज की सम्मान्या, सहृदया, सम्पन्ना एवं गुणवती नारियाँ अल्पज्ञ ग्रामवासिनियों के आत्मोद्धार के लिए संकल्पबद्ध है। संस्था की अध्यक्षा श्रीमती 'कमलशेखावत' राज्यसरकार में अतिरिक्त पुलिस अधीक्षिका के महत्त्वपूर्ण पद पर कार्यरत है। अन्य सदस्य नारियाँ भी शासनतन्त्र, न्याय विभाग पुलिस विभाग में उच्चपदों पर प्रतिष्ठित हैं निश्चय ही नारियों द्वारा नारियों के आत्मोद्धार के लिए किया गया यह प्रयास कल्पवृक्ष की भाँति फलदायक होगा।

## निवेदन

**भारती पत्रिका कार्यालय अपने आदरणीय ग्राहकों तक प्रतिमाह समय पर पत्रिका पहुँचाने की व्यवस्था सुनिश्चित करना चाहता है। इस दृष्टि से सभी ग्राहकों से निवेदन है कि निम्नानुसार अपनी सूचनाएं कार्यालय को पोस्ट कार्ड द्वारा अथवा इसी पत्र को काट कर लिफाफे में कार्यालय के पते पर भेजने का श्रम करें। यदि उक्त प्रकार से सूचना भेजने में कठिनाई हो तो मोबाइल नं.– 09352030291 / 8947055999 पर सूचना लिखवा सकते हैं अथवा SMS भी कर सकते हैं।**

**नाम ....................................पुत्र/पुत्री श्री.............................भवन संख्या............**
**गली/ मोहल्ला/कॉलोनी.................................. वाया/पोस्ट ऑफिस.............................**
**तहसील............................... जिला....................... राज्य..........................**
**देश................... पिन.......................................दूरभाष............................**
**मोबाईल नं...............................ईमेल..............................................................**

**निवेदक सुदामा शर्मा, प्रबन्ध सम्पादक**
**भारती संस्कृत मास पत्रिका**
**बी–15, भारती भवन, न्यू कॉलोनी, जयपुर–302001 (राज.) दूरभाष–2379014**
ई–मेल – sanskritbharti09@gmail.com

आयुर्वेद स्तम्भः

# लभते ना रसायनात्

❑ प्रो. बनवारीलालगौडः
पूर्व-कुलपतिः

**रसायनप्रयोगेण शारीरधातूनामभिवर्धनं पोषणं सुस्थिरीकरणञ्च भवति। रसायनप्रयोगस्यास्य वैशिष्ट्यं वर्तत आयुर्वेदे। सर्वास्वायुर्वेदसंहितासु रसायनप्रयोग-विधीनां विशिष्टानाञ्च रसायनयोगानामुल्लेखो वर्तते। आयुर्वेदे भेषजस्य द्विविधत्वं निर्दिष्टं वर्तते। यद्धि भेषजं केवलं रोगहरणं करोति तत्तु रोगनुद् भवति, यच्च स्वस्थस्योर्जस्करं भवति तत्तु द्वितीयात्मकं भवति भेषजम्। यद्भेषजं स्वस्थस्योर्जस्करं भवति तदपि द्विविधं भवति, यथावृष्यं भेषजं, रसायनं भेषजमिति च।**

रसायन के प्रयोग से शरीर के धातुओं का अभिवर्धन, पोषण और सुस्थिरीकरण होता है। इस रसायन-प्रयोग का आयुर्वेद में वैशिष्ट्य है। सभी आयुर्वेदीय संहिताओं में रसायन के प्रयोग की विधियों का और रसायन के योगों का उल्लेख है। आयुर्वेद में भेषज का द्विविधत्व निर्दिष्ट है। जो भेषज केवल रोग का हरण करती है। वह तो रोगानुसार रोग को दूर करने वाली होती है। और जो स्वस्थ के ऊर्जस्कर होती है वह भेषज का द्वितीय प्रकार है। जो भेषज स्वस्थ के ऊर्जस्कर होती है वह भी दो प्रकार की होती है, जैसे- वृष्य (वाजीकर) भेषज और रसायन भेषज।

**अत्रैतदपि स्पष्टीकरणमपेक्षितं वर्तते यत् स्वस्थ-स्योर्जस्करं भेषजं बाहुल्येन रसायनपरकं वृष्यात्मकञ्च भवति, एतत्स्वरूपात्मकं भेषजं रोगहरणमपि करोति। अत एव ये हि रसायनयोगाः वृष्ययोगाश्च भवन्ति ते विशिष्टेषु रोगेषु विशेषरोगेण क्षीयमाणशरीरेषु च न केवलं शरीरस्य दाढ्र्यमावहन्त्यपितु तेषां विशिष्ट-रोगाणामपाकरणेऽपि समर्था भवन्ति। यथा हि क्षतक्षीणराजयक्ष्मजीर्णज्वरपाण्डुरोगेत्यादिषु प्रयुक्ताः विशिष्टैः द्रव्यैर्निर्मिताः रसायनयोगाः व्याधिहरणं शरीरस्योर्जायाः वर्धनमपि च कुर्वन्ति। अत एवाचार्येण भेषजस्य द्विविधत्वकथनक्रमे 'किञ्चिद्' इति पदस्य प्रयोगो विहितः, यथा-**

**''स्वस्थस्योर्जस्करं किञ्चित् किञ्चिदार्तस्य रोगनुत्''**

**( च.चि. 1/1/14 )**

यहाँ यह भी स्पष्टीकरण अपेक्षित है कि स्वस्थ के ऊर्जस्कर भेषज बहुलता से रसायन स्वरूप की और वृष्य स्वरूप की होती है। इस तरह की भेषज रोगहरण भी करती है। इसलिए जो रसायनयोग तथा वृष्ययोग होते हैं वे विशेष रोगों में और विशेष रोगों से क्षीण होते हुए शरीरों में न केवल शरीर की दृढ़ता को करते हैं अपितु उन विशिष्ट रोगों को दूर करने में भी समर्थ होते हैं। जैसे कि क्षतक्षीण, राजयक्ष्मा, जीर्णज्वर, पाण्डुरोग इत्यादि व्याधियों में प्रयुक्त विशिष्ट द्रव्यों से निर्मित रसायनयोग व्याधि का हरण और शरीर की ऊर्जा का वर्धन भी करते हैं। इसलिए आचार्य ने भेषज को दो प्रकार का कहने के क्रम में 'किञ्चित्' इस पद का प्रयोग किया है, जैसे- कुछ भेषज स्वस्थ के प्रशस्त भावों को करने वाली और कुछ भेषज रोगी के रोग को दूर करने वाली होती हैं।

**पदस्यास्य स्पष्टीकरणक्रमे चरकचतुराननः चक्रपाणिः व्याख्याति यत्- 'ननु यदि स्वस्थोर्जस्करमपि व्याधिहरं', व्याधिहरञ्च स्वस्थोर्जस्करं, तत्किं किञ्चिदिति पदेन भेषजकर्मव्यवस्थादर्शकेन क्रियते? ब्रूमः-बाहुल्येन स्वस्थोर्जस्करत्वं व्याधिहरत्वञ्च व्यवस्थाप्यते, न चेह सर्वार्तरोगहरस्य स्वस्थोर्जस्करत्व-मिति प्रतिज्ञायते, येन पाठासप्तपर्णादीनामपि रसायनत्वं साधनीयशक्तित्वादार्तरोगहरत्वेन यदुच्यते तदपि रसायनं वाजीकरणं भवतीति लवमात्रोपदर्शनं क्रियते, तत् स्वस्थार्तयोरुभयार्थकर्तृत्वम्। एभिः चक्रपाणिवाक्यैः स्पष्टम्भवति यत् द्रव्याणि हि बाहुल्येन यद् यत्कार्यं साधयन्ति तदधिकृत्यैव तेषां स्वस्थोर्जस्करत्वं रोगहरत्वं वा व्यवस्थाप्यते। सामान्यतया बहवः रसायनयोगाः ( न तु सर्वे ) रोगहरणमप्यल्पत्वेन कुर्वन्त्येवमेव हि रोगापहारका अपि केचिद् योगाः कदाचिद्रसायनकर्म कुर्वन्ति।**

इस पद के स्पष्टीकरण के क्रम में चरकचतुरानन चक्रपाणि व्याख्या करते हैं कि ''निश्चय ही यदि स्वस्थ की ऊर्जस्कर भी व्याधिहर होती है तो व्याधिनाशक भी स्वस्थ की ऊर्जस्कर भी व्याधिहर होती है तो फिर चिकित्साकर्म की व्यवस्था के प्रदर्शक इस 'किञ्चित्' पद का क्या प्रयोजन है? इस सम्बन्ध में हम कहते है- बहुलता के आधार पर स्वस्थ की ऊर्जस्करता तथा व्याधिहरता का व्यवस्थापन किया जाता है (अर्थात् जो कार्य अधिक होता है उसी के आधार पर नामकरण किया जाता है) और यहाँ सभी रोगियों के रोगविनाशक भेषज की स्वस्थोर्जस्करता उद्घोषित (प्रतिज्ञात) नहीं की जा रही है, जिससे पाठा, सप्तपर्ण आदि द्रव्यों की भी रसायनता साधनीय शक्ति होने से रोगी के रोगविनाशक के रूप में जो कथन किया जाता है वह भी रसायन और वाजीकरण होता है, यह स्वल्पमात्र प्रदर्शन किया जाता है वह स्वस्थ एवं रोगी (इन दोनों) के फलकारक होता है।'' चक्रपाणि के इन वाक्यों से स्पष्ट होता है कि द्रव्य बहुलता से जिस जिस कार्य को करते हैं उसी को ध्यान में रखकर उनका स्वस्थोर्जस्करत्व या रोगहरत्व व्यवस्थापित किया जाता है। सामान्यतया अनेक रसायनयोग (सभी नहीं) थोडा रोगहरण करते हैं, इसी तरह रोग का अपहरण करने वाले भी कुछ योग कभी रसायन कर्म को करते हैं।

**स्वस्थोर्जस्करभेषजेषु ये वृष्यात्मकाः योगाः भवन्ति ते वीर्याभिवर्धकाः भवन्ति, वृष्यात्मकस्यास्य स्वरूपस्य वर्णनं केषुचिल्लेखेषु पश्चात्करिष्यामि, कदा करिष्यामीति तु प्रतिज्ञां न करोमि पुनरपि करिष्यामीति कथनमेव पर्याप्तम्। स्वस्थोर्जस्करक्रमे तु ये बहवः रसायनयोगाः सन्ति तेषु कतिपययोगानां वर्णनं कृतं मया। अत्र तु चरकाचार्यस्य वाक्यैरेव रसायनफलमुद्ध्रियते -**

**दीर्घमायुः स्मृतिं मेधामारोग्यं तरुणं वयः।**
**प्रभावर्णस्वरौदार्यं देहेन्द्रियबलं परम्।।**
**वाक्सिद्धिं प्रणतिं कान्तिं लभते ना रसायनात्।**
**लाभोपायो हि शस्तानां रसादीनां रसायनम्।।**
**(च.चि. 1/1/7-8)**

**विधिपूर्वकं रसायनसेवने प्रशस्तानां रसादिधातूनामभिवृद्धिर्भवति। अत्र प्रणतिस्तु लोकवन्द्यता वर्तते। एतत्सर्वं विधिपूर्वकसेवनेनैव ना रसायनात् लभते।**

स्वस्थोर्जस्कर औषधियों में जो वृष्य (वाजीकरण) योग होते हैं वे वीर्य का अभिवर्धन करने वाले होते हैं। वृष्यात्मक इस स्वरूप का वर्णन कुछ लेखों में बाद में करूँगा। कब करूँगा यह प्रतिज्ञातो नहीं करता हूँ फिर भी 'करूँगा' यह कहना ही पर्याप्त है। स्वस्थोर्जस्कर क्रम में तो जो बहुत से रसायनयोग हैं उनमें कुछ योगों का वर्णन मैंने पिछले कई लेखों में कर दिया है। यहाँ आचार्य चरक के वचनों के माध्यम से ही रसायन के फल को उद्धृत किया जा रहा है-

मनुष्य रसायन का सेवन करने से दीर्घ आयु, स्मृति, मेधा, आरोग्य, तरुणावस्था एवं प्रभा में औदार्य (कान्तियुक्त शरीर), वर्ण में औदार्य (वर्ण का श्रेष्ठत्व), स्वर में उदरता (श्रेष्ठता), शरीर तथा इन्द्रियों में उत्तम बल, वाक्सिद्धि, प्रणति, कान्ति इन गुणों को प्राप्त करता है। निश्चित ही प्रशस्त गुणों से युक्त रसादि धातुओं को प्राप्त करने का जो उपाय है, वह रसायन है।

विधिपूर्वक रसायन का सेवन करने से प्रशस्त रसादि धातुओं की वृद्धि होती है। यहाँ प्रणति का तात्पर्य लोकवन्द्यता है। (लोग जिस को प्रणाम करें)। यह सब विधिपूर्वक रसायन का सेवन करने से मनुष्य प्राप्त करता है।

**पुरा यथाऽमराणाममृतं यथा च भोगवतां सुधा जरामरणहर्यभवत् तथैव महर्षीणां रसायनविधिः जरामरणहरः ख्यातः। पुरा महर्षयोऽन्ये च ये जनाः रसायनपराः आसन् ते न जरां न च दौर्बल्यं नातुर्यम् अकाले निधनं च नैव प्राप्नुवन्। रसायनसेवनेन न केवलं दीर्घमायुरिहावाप्यतेऽपितु परलोकैषणायाः क्रमेऽपि मोक्षावाप्तिः सरलतया भवति। यः स्वस्थः पुष्टश्च भवति स एव योगसाधनायां सक्षमो भवति। यम-नियम-आसन-प्राणायामप्रत्याहार-धारणा-ध्यान-समाधीत्यात्मकस्याष्टाङ्गयोगस्य साधना पूर्णरूपेण स्वस्थः पुष्टश्च जनः कर्तुं शक्नोति। चरकसंहितायां स्पष्टरूपेण प्रोक्तं यत्-**

**न केवलं दीर्घमिहायुरश्नुते,**
**रसायनं यो विधिवन्निषेवते।**

**गतिं स देवर्षिनिषेवितां शुभां,**
**प्रपद्यते ब्रह्म तथेति चाक्षयम्।।**

**( च.चि. 1/1/80 )**

**मोक्षसाधनत्वञ्चेह रसायनस्य विशुद्धसत्त्वकर्तृत-योच्यते। अत्रैतदपि विवेचनीयं वर्तते यत् न हि सर्वाणि द्रव्याणि रसायनकर्मणि प्रयोज्यानि भवन्ति। विशिष्टाना-मुग्रवीर्यात्मकानां भल्लातकरसोन-शुण्ठी-यवानी-पिप्पली-मेथिकादीनां द्रव्याणां तथा मुसली-मुञ्जातक-अश्वगन्धा-एरण्ड-बलेत्यादीनां शरीरपुष्टिकराणां द्रव्याणां तथा चरक-सुश्रुतोक्तानां यथोपलब्धानां दिव्यौषधीनां प्रयोगस्तथा हरीतकी-शिलाजतु-आमलकी-विडङ्गेत्या-दीनां रसायनगुणात्मकानां द्रव्याणां प्रयोगोऽथवा च्यवनप्राश-ब्राह्मरसायनेत्यादीनां विशिष्टानां रसायन-गुणात्मकानां योगानां प्रयोगः यदा रसायनविधिना क्रियते तदैव ना रसायनात् रसायनफलं लभते। पुरा रसायनप्रयोगस्य विधिः विशेषेण स्वास्थ्यप्राप्त्यर्थं दीर्घायुः प्राप्त्यर्थञ्च महर्षिषु प्रचलित आसीत्। आचार्यः चरकः निर्दिशति यत् च्यवनादयः महर्षयः रसायनसेवनेना-मितायुषः बभूवुः। यथा हि –**

**प्राणकामाः पुरा जीर्णाश्च्यवनाद्या महर्षयः।**
**रसायनैः शिवैरेतैर्बभूवुरमितायुषः।।**
**ब्राह्मं तपो ब्रह्मचर्यमध्यात्मध्यानमेव च।**
**दीर्घायुषो यथाकामं संभृत्य त्रिदिवं गताः।।**
**तस्मादायुः प्रकर्षार्थं प्राणकामैः सुखार्थिभिः।**
**रसायनविधिः सेव्यो विधिवत्सुसमाहितैः।।**

**( च.चि. 1/2/20-22 )**

प्राचीनकाल में जिस तरह से देवताओं के लिए अमृत और नागों के लिए सुधा (अमृत का ही भेद) जरा और मृत्यु का हरण करने वाली हुई उसी प्रकार से महर्षियों के लिए रसायनविधि जरा और मृत्यु को हरण करने वाली प्रसिद्ध हुई। प्राचीन काल में महर्षिगण तथा अन्य लोग जो भी रसायनसेवन करने वाले थे उन्होंने न वृद्धावस्था को, न दुर्बलता को, न रुग्णावस्था को तथा न अकाल मृत्यु को प्राप्त किया। इस लोक में रसायन सेवन से केवल दीर्घ आयु ही प्राप्त नहीं होती अपितु परलोकैषणा के क्रम में भी मोक्ष की प्राप्ति सरलता से होती है। जो स्वस्थ और पुष्ट होता है वही योगसाधना में सक्षम होता है। यम, नियम, आसान, प्राणायाम, प्रत्याहार, धारणा, ध्यान और समाधि इनसे युक्त आष्टाङ्गयोग की साधना पूर्ण रूप से स्वस्थ और पुष्ट व्यक्ति ही कर सकता है। चरक संहिता में स्पष्ट रूप से कहा गया है कि-

जो रसायन को विधिपूर्वक सेवन करता है वह न केवल इस लोक में दीर्घ आयु को प्राप्त करता है अपितु देवताओं तथा ऋषियों द्वारा सेवित उत्तम गति को प्राप्त करता है, तथा अक्षय ब्रह्म को भी प्राप्त करता है।

यहाँ इस प्रसङ्ग में रसायन की विशुद्ध सत्त्वकर्तृता के कारण ही मोक्षसाधनता कही गई है। यहाँ यह भी विवेचन के योग्य है कि सभी द्रव्य रसायनकर्म में प्रयोग के योग्य नहीं होते। उग्र वीर्यवाले भिलावा, लहसुन, सोंठ, अजवायन, पीपल एवं मेथी इत्यादि द्रव्यों का तथा मुसली, मुञ्जातक, अश्वगन्धा, एरण्ड, बला इत्यादि शरीर पुष्टिकारक द्रव्यों का तथा चरक एवं सुश्रुत संहिता में कही गई यथोपलब्ध दिव्यौषधियों का प्रयोग तथा हरीतकी, शिलाजतु, आँवला, विडङ्ग इत्यादि रसायनगुणवाले द्रव्यों का प्रयोग अथवा च्यवनप्राश, ब्राह्मरसायन इत्यादि विशिष्ट रसायनगुण वाले योगों का प्रयोग जब रसायनविधि से किया जाता है तथा मनुष्य रसायन से रसायन के फल को प्राप्त करता है। प्राचीनकाल में रसायन के प्रयोग की विधि विशेष रूप से स्वास्थ्य प्राप्ति के लिए और दीर्घायु की प्राप्ति के लिए महर्षियों में प्रचलित थी। आचार्य चरक निर्देश देते हैं कि च्यवनादि महर्षि रसायनसेवन से अमित आयु वाले हुए। यथा –

प्राचीनकाल में प्राणों की इच्छा रखने वाले (दीर्घ आयु की इच्छा रखने वाले) वृद्ध च्यवन आदि महर्षि कल्याणकारी इन रसायन-प्रयोगों से अपरिमित आयु वाले हुए। दीर्घ आयु वाले (महर्षि) ब्रह्मसम्बन्धी तप, ब्रह्मचर्य और अध्यात्म सम्बन्धी ध्यान (या आध्यात्म एवं ध्यान) अपनी इच्छा के अनुसार करके स्वर्ग (देवलोक) में चले गए। इसलिए सुख को चाहने वाले सावधान एवं प्राणों की कामना करने वाले व्यक्ति आयु के प्रकर्ष के लिए विधिपूर्वक रसायनविधि का सेवन करें।

**80, सेनापति हाउस के पीछे, झोटवाड़ा, जयपुर**

संस्कृतसमाचारः

# वेदाध्ययनात् लोककल्याणं सिद्धयति-राष्ट्रपतिः श्री प्रणव मुखर्जी

वेदाः संस्कृतिसम्प्रदायान् प्रतिबिम्बयन्तीति, वेदाध्ययनात् लोककल्याणं सिद्ध्यतीति, वेदाः केवलं व्यक्तये, समाजाय च परिमिताः न सन्तीति, विश्वमानवसौभ्रातृत्वस्य प्रतीकचिह्नानीति राष्ट्रपतिः प्रणवमुखर्जी उदबोधयत्। सनातनधर्मस्य वेदाः स्तम्भा इति, अस्माकं सम्प्रदायः, भारतीयमूल्यानि वेदानां समग्रप्राचीनभवनसदृशानीत्यकथयत्। प्राचीनवेदविज्ञानस्य, वैशिष्ट्यस्य च विस्तृतरूपेण प्रचारकरणस्यावश्यकता नितरामस्तीति उदघोषयच्च। आध्यात्मिकभावनाः, वसुधैव कुटुम्बकमिति एताः भारतीयसंस्कृतिं प्रचारयन्ति। युनेस्को संस्था अपि वेदान् भारतीयसम्पद्रूपेण न्यरूपयत्। अतः वेदानां परिरक्षणोत्तरदायित्वं सर्वेषु वर्तते इति अवदत्। वेदविद्वांसः चतुर्दशविद्याः, चतुरो वेदान् षडङ्गानि, पुराणानि, न्यायमीमांसाधर्मशास्त्राणीति व्यभजन्त इति, अनेन वेदाध्ययनेन प्रपञ्चशान्तिः, सौभाग्यञ्च सिद्ध्यते इति अकथयन्। तिरुमलतिरुपतिदेवस्थानस्य संस्थानेन प्रचाल्यमानाः वेदपाठशालाः महर्षिभिः स्थापिताः अध्ययनकेन्द्राणि स्मारयन्तीति, वेदसारं परिगृह्य अध्ययनकरणम् अत्यन्तम् आवश्यकमिति अवोचत्।

**वेदपठनेन नैतिकमूल्यानि वर्धन्ते - श्री चन्द्रबाबू नायडू**

वर्तमानकाले नैतिकमूल्यानां वृद्धये वेदाध्ययनम् उपकरोतीति, वेदाध्ययनेन आरोग्यम्, आनन्दः, आह्लादश्च प्राप्यते इति च आन्ध्रप्रदेशस्य मुख्यमन्त्री श्री चन्द्रबाबूनायुडू अकथयत्।

(दिनांक 15-12-2015 दिनाङ्क - प भौमवारे वेदपाशालायाः उद्घाटनावसरे) **ऑन लाइन द्वारा प्रवेशप्रक्रिया-यूजीसी- अध्यक्षः प्रो. वेदप्रकाशः**

देशे विद्यमानाः सर्वे विश्वविद्यालयाः स्वीयेषु मान्यताप्राप्तमहाविद्यालयेषु, अन्यासु च संस्थासु प्रवेशप्रक्रियाम् आन लाईन द्वारा कुर्युरिति विश्वविद्याल-यानुदानायोगः (यू.जी.सी.) समसूचयत्। अस्मिन् विषये यूजीसी संस्थायाः अध्यक्षः प्रो. वेद प्रकाशः सर्वेषां विश्वविद्यालयानां कुलपतिभ्यः लेखेमलिखत्। आगामिनः सत्रात् (2016-17) तत्तत्पाठ्यक्रमेषु आन लाईन माध्यमेन प्रवेशप्रक्रिया भवेदिति अवदत्। यदि इदानीमेव येषु विश्वविद्यालयेषु आन लाईन द्वारा प्रवेशप्रक्रिया प्रचलति तर्हि तदर्थं प्रयुज्यमानस्य मृदूपागमं (साफ्टवेर), विधिविधानं च विश्वविद्यालयानुदानयोगाय सूचनीयमिति प्रो. वेद प्रकाशः असूचयत्। यदियं प्रक्रिया वैकल्पिकरूपेण प्रचलति चेत् आगामिनि वर्षे सम्पूर्णरूपेण एनां प्रक्रियां स्वीकर्तुं यद्विधानं विद्यते तत् अवश्यं यूजीसी कृते सूच्यम् इति च सः निरदिशत्।

डॉ. कम्भम्पाटि साम्बशिवमूर्तिः, अधिष्ठाता, शिक्षासङ्कायः,
जगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृतविश्वविद्यालय, जयपुरम्

# प्रो. बनवारीलाल गौड़ सम्मानितः




भारतीयपारम्परिकैशियायीस्वास्थ्यपरिषदा पुणे नगरे आयुर्विज्ञाने प्रगतिरिति विषयमवलम्ब्य समायोजिते प्रथमान्ताराष्ट्रियसम्मेलने वर्तमान-जनवरीमासस्य चतुर्थे दिनाङ्के भारतसर्वकारस्य आयुषमन्त्रालयस्य स्वतन्त्र-प्रभारवता राज्यमन्त्रिणा श्रीपादनाईकमहोदयेन प्रो. बनवारी-लालगौड़महाशयः आयुर्वेदस्य अध्ययनाध्यापनप्रशिक्षणक्षेत्रे सम्पादितायै सर्वोत्कृष्टसेवायै 'श्रीमज्जुगतरामवैद्य पुरस्कारेण' सम्मानितः। प्रोफेसर श्रीगौडमहाशयः चरक संहितायाः कृतभूरिपरिश्रमो विशेषज्ञत्वेन विश्रुतो विद्वान् वरीवर्तते-अमुष्य सहस्राधिकाः शिष्याः प्रशिष्याश्च आयुर्वेदजगतः श्रीवृद्धिं विदधानाः वर्तन्ते। अमुना प्रणीता विविधा ग्रन्थाः पाठकानां प्रीत्यै प्रेरणायै च प्रसिद्धाः सन्ति। डा. एस.आर. राजस्थानायुर्वेदविश्वविद्यालयस्य कुलपतिचरः, जयपुरस्थ, राष्ट्रीयायुर्वेद संस्थानस्य निदेशकचरश्चासौ महानुभावः साम्प्रतम् आयुर्वेदमहासम्मेलन-पत्रिकायाः प्रधानसम्पादकत्वं निर्वहति। भारती-परिवारो विविधपुरस्कारसभाजितायामुष्मै दीर्घायुष्यं नैरुज्यं चानाथनाथतः विश्वनाथतः नाथते एवं विज्ञापयति कलावटियेत्युपाह्वो राधेश्यामः।

संस्कृतसमाचारः

# जगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृतविश्वविद्यालयस्य प्रथमदीक्षान्तसमारोहः

## ( विशिष्टविवरणम् )




राजस्थाने जयपुरे विद्यमानस्य जगद्गुरुरामानन्दाचार्य-राजस्थानसंस्कृतविश्वविद्यालयस्य प्रथमदीक्षान्तसमारोहः विश्वविद्यालयस्य परिसरे दिनाङ्के 16-12-2016, बुधवासरे सुसपन्नः। अस्मिन् समारोहे राजस्थानस्य माननीयः राज्यपालः श्रीकल्याणसिंहमहोदयः मुख्यातिथिरूपेण उपस्थाय स्नातकेभ्यः उपाधीन्, स्वर्णपदकान् प्राददत्। समारोहं सम्बोधयन् माननीय राज्पालमहोदयः अवदत् यत्-संस्कृतभाषा श्रेष्ठभाषा वर्तते यस्याः व्याकरणं स्वयमेव पूर्णमस्ति। अस्माकं सर्वे धार्मिकग्रन्थाः अस्यामेव भाषायां रचिताः। अस्माकं गौरवपूर्णः अतीतकालः अति अत्रैव उपलभ्यते।

संस्कृतं देववाणी इति कथ्यते। संस्कृतभाषाया जनभाषात्वेन विकासकरणम् अत्यन्तम् आवश्यकमस्ति। दीक्षान्तसमारोहः छात्राणां औपचारिकशिक्षायाः परिश्रमस्य, सङ्कल्पस्य, दृढनिश्चयस्य, निष्ठायाः तथा औपचारिक-शिक्षायाः अन्तिमचरणस्य च प्रतीकचिह्नमस्ति। इदानीं भवद्भिः व्यावहारिकजीवनस्य नूतनयात्रा प्रारभ्यते। अस्यां यात्रायां कदाचित् काश्चन कठिनताः आगच्छन्ति। समस्यानाम् उत्तीर्णाय सङ्कल्पशक्तेः अतीव महत्त्वपूर्णं योगदानमस्ति। उपाधिरयं भवतां परिश्रमस्य दर्पणः विद्यते। अत्र भवतां बुद्धिमत्ता, प्रतिभा च प्रतीयते। अस्य संस्कृतविश्वविद्यालयस्य भावनाः अपि अत्र अन्तर्भवन्ति। उपाधिप्राप्तये भवतां मातापित्रोः, गुरूणाम् आशीर्वादस्य फलमयमुपाधिः। समस्तविश्वविद्यालयेषु प्रतिभायाः विकासाय भवतां सर्वेषां सहयोगः अपेक्षितः। समयानुकूलं शिक्षायाः परिवर्तनाय भवन्तः सर्वे संसिद्धाः भवन्तु। जीवनस्य बृहल्लक्ष्याणि निर्धारयेयुः। पुनश्च तेषां लक्ष्याणां निरन्तरसाधनेन सफलतायाः प्राप्तिः निश्चितरूपेण भवति। ज्ञानस्य अभिज्ञानम्-आचरणेन, व्यवहारेण, चिन्तनेन च परिलक्षितं भवति। व्यक्तित्वस्य, प्रतिभायाश्च चतुर्मुखीनविकासः शिक्षायाः मूलभावना अस्ति।

भवन्तः सामाजिककार्येषु सम्मिलिताः भवेयुः। भवन्तः यां शिक्षां प्राप्तवन्तः तया शिक्षया समाजस्य, राज्यस्य, देशस्य विकासाय महत्त्वपूर्णं योगदानं करणीयम्। जीवनस्य सफलतायै व्यक्तेः पौरुषस्य , परिश्रमस्य पराकाष्ठा एव मूलमन्त्रः वर्तते। वयमस्माकम् अतीतकालस्य शिक्षापद्धतिं, प्रणालिं वा स्मरामश्चेत् अस्माकं नालन्दा, विक्रमशिला, वल्लभी, काशी इत्यादीनाम् उच्चशिक्षापीठानां ज्ञानं भवति, येषां शताब्दीः यावत् विश्वे प्रभावमस्थापयत्। एकं पृथक् परिदृश्यं अस्माकं समक्षं परिदृश्यते यद्ये भारतीयाः मेधाविनः छात्राः उच्चशिक्षाग्रहणाय विदेशीयविश्वविद्यालययान् प्रति गच्छन्ति। किमेतत् विडम्बना नास्ति ? शिक्षायाः क्षेत्रे समाजेन अस्मिन् विषये नूतनः विचारः कार्यः। अद्य शिक्षाप्राप्तेः विकासः कार्य एव यतोहि अत्रत्याः प्रतिभाशालिनः छात्र-छात्राः विदेशान् प्रति आकृष्टा न भवेयुः। अस्माभिः सर्वैः मिलित्वा अयं सङ्कल्पः स्वीकार्यः यत् अस्माकं विश्वविद्यालयेषु प्राचीनकालिकं गौरवं पुनः स्थापयामः, विश्वपटले देशस्य अभिज्ञानं पुनः प्रतिष्ठापयामः।

विश्वविद्यालयानाम् एतद्दायित्वमस्ति यदस्माकम् अद्यतनीयाः याः समस्याः वर्तन्ते तासां समाधानाय क्षमतया स्वस्नातकान् परिपूर्णान् कुर्मः। अस्माकं पाठ्यक्रमानपि समसामयिकान् कुर्मः। अस्माकम् उच्चादर्शभूतानां स्वप्नानां देशस्य निर्माणयोग्यान् समर्पितभावयुक्तान्, परिश्रमिणः, निष्ठावतः युवानः सिद्धीकुर्मः। अस्मिन् अवसरे श्रीनारायणदास जी महाराजान् प्रति धन्यवादं प्रकटयामि, यतोहि सः संस्कृतसेवाव्रतं स्वीचकार। अहं भवद्भ्यः सर्वेभ्यः कृतज्ञतां प्रकटयामि, शुभकामनाश्च प्रददामि। धन्यवादः। जय हिन्द।

आदौ तावत् विश्वविद्यालयस्य कुलपतिः प्रो. विनोद शास्त्री सर्वेभ्यः अतिथिमहाभागेभ्यः स्वागतवचनं व्याजहार। अपि च सर्वैः स्नातकैः वेदोक्तदीक्षाम् अकारयत्। अस्मिन् कार्यक्रमे बगरूक्षेत्रविधायकः श्रीकैलाश वर्मा अपि भागमग्रहीत्। विश्वविद्यालयस्य कुलसचिवा श्रीमती सीमा सिहंमहोदया धन्यवादान् प्राकटयत्।

प्रेषण–प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८–५७

डाक पंजीयन
Jaipur City/429/2015-17

हार्दिक शुभकामनाओं सहित :-

# ए इन्फ्रास्ट्रक्चर लिमिटेड

निर्माता

## ए.सी. प्रेशर पाइप्स

तकनीकी रूप से सर्वोत्तम, पेयजल, कृषि, सीवरेज एवम् सेनिटेशन में उपयोगी
तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ
फाइबर सीमेंट की नालीदार चादरें

## छत एक, लाभ अनेक

हमीरगढ़ भीलवाड़ा - 311025 (राजस्थान) दूरभाष: 01482-286106/07
दिल्ली कार्यालय: ए-9, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाष:- 011-26850488
जयपुर पाइप कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड, एम.आई.रोड़, जयपुर
फोन: 0141-2369691, 2370566, फैक्स : 0141-4019691
जयपुर चादरें कार्यालय: शोरूम नं. 2, फर्स्ट फ्लोर, नियर रिद्धी-सिद्धी स्वीट्स, लिंक रोड़, गोपालपुरा, जयपुर
फोन : 0141-3206915, फैक्स:- 0141-2763656

## राष्ट्रीय विचारों के लिए पढ़ें

# पाञ्चजन्य Organiser

हमारी विशेषताएं

- राष्ट्रीय दृष्टिकोण
- 6 दशकों से लगातार प्रकाशित
- संसद तथा विधान सभाओं को गुंजायमान करने वाला पत्र
- विश्वसनीय प्रतिष्ठित दायित्वपूर्ण पत्रकारिता
- हजारों शैक्षिक, व्यावसायिक प्रतिष्ठानों एवं पुस्तकालयों में पहुंच
- ई–पेपर की सुविधा

You can subscribe **Panchjanya/Organiser** Weeklies Online
through our **Websites: www.panchjanya.com, www.organiser.org**

**ग्राहक शुल्क भारत में : वार्षिक शुल्क रु. 625/- एवं द्विवार्षिक रु. 1100/-**

विदेशों में (हवाई डाक द्वारा) : वार्षिक शुल्क ... **$ 60**

**Reach millions of consumers through our weeklies**

## भारत प्रकाशन (दिल्ली) लि.

2322, लक्ष्मीनारायण स्ट्रीट, पहाड़गंज, नई दिल्ली-11005 www.organiser.org & www.panchjanya.com
दूरभाष: 011-47642000 से 30 फैक्स: 011-47642015 E-mail: circ@pbdl.in

स्वत्वाधिकारी–भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम् दूरभाषः २३७९०१४ प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम् दूरभाषः २३६५७२१ पत्रसंकेतः– भारतीभवनम्, बी–१५ न्यू कॉलोनी, जयपुरम्–३०२ ००१ भारतीयसंस्कृतप्रचार संस्थानस्य अध्यक्षः शंकर प्रसाद शुक्लः

प्रतिष्ठायाम्,